त् अलिपत अलिप्त षिच क्षरणे सिञ्चति सिषिचे असिचत् असिचत असिक्त इत्याद्ये कृषीगतो कृषति आ नर्ष ओव्रश्चू छेदने वृश्चति व
व्रश्च वव्रश्चतुः वव्रश्चुः वव्रश्चिथ वव्रष्ठ व्रश्चिता व्रष्टा व्रश्चिष्यति व्रक्ष्यति अव्रश्चीत् अव्राक्षीत् अव्राष्टाम् व्यचू व्याजीकरणे विचति विव्याच
विविचतुः विव्याचिथ व्यचिता व्यचिष्यति अव्याचीत् अव्यचीत् उछि उञ्छे उञ्छति उञ्छाञ्चकार औञ्छीत् ॥ [illegible] पुनर्वस

संप्रसारणं न व्रश्च इदितो वेति वेट् वव्रश्चिथ स्कोरिति सलोपः व्रश्चेति षत्वं ष्टुत्वं वव्रष्ठ उदितो वेतीट् अव्रश्चीत् इडभावे स्कोरिति सलोपः व्रश [illegible] षत्वं षढो
रिति कः ततः सस्य षत्वं अव्राक्षीत् ननु अत्र शकारस्य कथं लोपः उच्यते नकारं [illegible] पंचमी कृ लिधातुषु सकारजः शकारस्त्वेषां दृवर्गस्तवर्गज इति १
व्यच व्याजीकरणे व्याजीकरणं छद्मकरणं ग्रहामिति संप्रसारणं णवादौ पूर्वस्येति पूर्वस्य संप्रसारणं च विविचतुः अतोहलादेरिति वा वृद्धिः अव्याचीत् अव्य

परः मिल स्वरा
देप्रत्ययनिमि
त्तस्यात्स्याम्
कृतात्स्वरात्
वीचो न इत्यस्य
विधौ कर्तव्ये ॥
धातोरुच्यमानं
कार्यं प्रत्ययेपरे
भवति ॥ स्वरा
दयलोपे एलोप
[illegible]
[illegible]

श्रा उच्छी विवासेस्वदेशंपरित्यज्यदेशांतरेगमनंविवासः सम्प्रति धातुपाठेद्वौ भ्वादिगणेपठितौ इह पुनः पाठस्तु उंछतीत्यत्रवादीपोःशानुरितिनुम् विकल्पार्थः अपु
री चं प्रत्ययेतु अप्यपीराच्चित्यमितिनित्यंनुम् उंछंती आच्छेर्नाम् आच्छतेराम् प्रत्ययो नलिडिंग्रहर्तनाम्यादित्वात्प्राप्ते निषेधः आच्छेर्लिटिगुणः आच्छतेर्गुणःस्यादित्रिदिलुभ विमो
उ हनं विमोहनमाकुलीकरणं इषुसहे तिवेट् लोभिता लोव्या तृपतृंफ तृप्तौ कृषस्पृशमृशेति सिविकल्पस्तु पोषादिकस्यैवङ्‌स्यापवादत्वात् तेनात्र नित्यं सिः
४१ उच्छी विवासे उच्छति उच्छांचकार औच्छीत् आच्छं गतीन्द्रियप्रलयमूर्तिभावेषु आच्छति आच्छेर्नाम् आच्छेर्लिटि गुणः तु गशाम्
आनर्च्छ आनर्च्छतुः आच्छिता उज्ज आर्जवे उज्जांचकार उज्झ त्यागे उज्झांचकार लुभ विमोहने लुभति लोभिता लोव्या अलोभीत् तृप तृम्पत
तृम्फ तृप्तौ तृपति अतर्पीत् तृंफादीनामप्रत्ययेनुम् तृम्फति तुप तुम्प तुफ तुम्फ हिंसायाम् तुपति तुतोप अतोपीत् तुम्पति अतुम्पीत् तु
फति तुतोफ अतोफीत् तुम्फति तुतुम्फ अतुम्फीत् दृप दृंफ उत्क्लेशे दृपति दृम्फति ऋफ ऋम्फ हिंसायाम् ऋफति ऋम्फति ऋम्फा
ञ्चकार गुफ गुम्फ ग्रन्थे गुफति गुम्फति अगुम्फीत् उभ उम्भ पूरणे उभति उवोभ औभीत् उम्भति उम्भांचकार औम्भीत् शुभ शुम्भ शोभा
र्थे शुभति अशोभीत् शुंभति अशुम्भीत् दृभी ग्रन्थे दृभति अदर्भीत् चृती हिंसाग्रन्थनयोः चृतति चचर्त दृदृतनीड्वा चर्तिष्यति चर्त्स्यति अचर्तीत्
विध विधाने विधति वेधिता लिख अक्षरविन्यासे लिखति लेखिता कुट कौटिल्ये कुटति चुकोट ॥ ९ अनर्पीत् तृंफादीनामप्रत्ययेनुम् आदि
शब्दः प्रकारेतेनयेत्रनकारानुषक्तास्ते तृंफादयः अप्रत्ययस्यङित्वान्नोलोप इतिनलोपेकृतेनुम् तृंफति दृपदृंफ उत्क्लेशे उत्क्लेशः पीडा चृती हिंसाग्रन्थ
नयोः ईदित्करणमादीदितइतीण्निषेधार्थं यद्यप्यस्यवेट्कत्वादिण्निषेधः सिद्धस्तथापि क्वचिद्वेट्कस्याऽनित्यतां ज्ञापयितुंईदित्करणंतेनधा
वितमिभराजधियेत्यादिसिद्धमितिन्नतन देतिवेट् चर्त्स्यति विध विधाने विधानं करणं कुट कौटिल्ये कुटिलस्यभावः कौटिल्यं तस्मिन् ॥ ॥ ॥ २ एमः ४१

रुधिर् आवरणे रुधादेर्नम् रुध् आदिर्यस्य स रुधादिस्तस्माद्रुधादेर्नम् प्रत्ययः स्यात् कर्त्रर्थेषु चतुर्षु मित्वादन्त्यात्स्वरात्परः नित्यत्वाद्गुणं बाधते नश्नोरिति निष
त्वं णत्वं रुणद्धि नमसोऽस्य इत्यचोलोपः रुंद्धः दिस्योरिति दिप्सिपोर्लोपः वावसाने इति धस्य दकारतकारौ सिपि दः स इति दस्य वा सः अरुणत् अरुणद् इ अरुणः।

। रुधिर् आवरणे रुधादेर्नम् कर्तरि चतुर्षु रुणद्धि नमसोऽस्य रुन्द्धः रुन्धन्ति रुणत्सि रुन्द्धे रुन्धाते अरुधत् अरुद्ध भिदिर् विदारणे
अभिदत् अभैत्सीत् अभित्त छिदिर् द्वैधीकरणे अच्छिदत् अच्छैत्सीत् अच्छित्त रिचिर् विरेचने रिणक्ति अरिणक् अरिचत् अरैक्षीत् अरिक्त
विचिर् पृथग्भावे विङ्क्ते अविचत् अवैक्षीत् अविक्त क्षुदिर् संपेषणे अक्षुदत् अक्षौत्सीत् अक्षुत्त युजिर् योगे अयुजत् अयौक्षीत् अयुक्त
उछृदिर् दीप्तिदेवनयोः छृणत्ति छृन्ते तत्र दद इति वेट् छृन्त्सीष्ट छर्दिषीष्ट अछृदत् अछर्दीत् अछर्दिष्ट उतृदिर् हिंसानादरयोः अतृदत् अत
र्दीत् इत्युभयपदप्रक्रिया शिष्लृ विशेषणे शिनष्टि शिंष्टः शिंषन्ति शेष्टा शेक्ष्यति अशिषत् पिष्लृ संचूर्णने पिनष्टि पेक्ष्यति अपिषत् भञ्जो
आमर्दने भनक्ति बभञ्जिथ बभंक्थ भङ्क्ता अभाङ्क्षीत् भुज पालनाभ्यवहारयोः भुनक्ति भुंक्तः अभुनक् अभुनग् अभोक्षीत्।
तृह हिसि हिंसायाम् तृहो नमि कृते इमागमः स्पिति हसे तृणेढि अतृणेट् अतर्हीत् इदितो नुम् नमः नम प्रत्ययात् परस्य नसालो
पः हिनस्ति हिंस्तः हिंसन्ति थे स लोपः हिन्धि प्रहि[illegible]जि हिंस अहिंसीत् उन्दी क्लेदने उनत्ति उन्तः उन्दन्ति औनत् औन्दन् उन्दाञ्चकार औन्दी

त्तत्तदेति वेट् च छृदि ये च छृत्सीड् इत्यात्मनेपदसादिति हेर्धिः अवेद् इति षस्य डः [illegible] त्वं अनुस्वारपरसवर्णौ शिण्ड्ढि हसात्परस्य म्नसस्येति ङ्लोपे शिण्ढि
लित्पुषादेरिति ङः अशिषत् भंजो आमर्दने ओदित्करणं त्वा चोदित इति नत्वार्थं भग्नः भुंज पालनाभ्यवहारयोः भुजोऽपालने इ[illegible]ति पदं वक्ष्यते तृहो नमि कृते इमागमः
हसे पिति तृहेः पूर्वं नम् ततः इम् स्यात् पिति हसे परे नम्प्रकरणात्तत्पस्य ग्रहणं उंदी क्लेदने के॰।।

श्री· दनमार्द्रीभावः नमइतिनलोपः उनत्तिउंद्यात् उनत्तु औनत् उंदांचकार उंद्यात् उंदिष्यति औन्दिष्यत् औन्दीत् ॥ॐ॥ अंजू व्यक्तिम्लक्षणकांतिगतिषु व्यक्ति
सि·चं· विवेचनंम्लक्षणं स्निग्धतानुमशाामितिनुकू आनंज अंजेःसेर्नित्यमिट् अंजेःपञ्चमसिप्रत्ययस्य इड्डा गमः स्यात् अंदेत्वा ह्विकल्पे प्राप्ते इदं विजेरिड्डादिप्र
उ· त्ययोङित् विजेः परस्य इट् सहितस्य प्रत्ययस्य ङित्वं स्यात् इति पं त्रिइं धीदीं ध्यानयोर्ड इतिधत्वं मवेजवाइति दत्वं इंधेर्नमीनकारस्यानुस्वारपरसवर्णौ नो
३९ लोपइतिनलोपस्तु नभवत्यच्लोपस्यासिद्धत्वात् स्या नेवं... इत्यात् इतिरुधादयः तनुविस्तारेतनादेरूपूतनन् आदिर्यस्य सतनादिस्तस्मादुपूव तेर्थेषु चतुर्षु

अञ्जू व्यक्तिम्र क्षणकान्तिगतिषु अनक्ति नुगशाेम् ऊदित्वात् वा आनञ्जि थ अनङ्क्थ अञ्जिता अङ्क्ता अञ्जेः सेर्नित्यमिट् आञ्जी
त् तञ्चू संकोचने तनक्ति अतञ्चीत् अतांक्षीत् ओविजी भयचलनयोः विनक्ति विजेरिड्डादिप्रत्ययोङित् विविजिथ विजिता अविजी
त् वृजीवर्ज्जने वृणक्ति अवर्जीत् पृची संपर्के पृणक्ति अपर्चीत् इतिपम् त्रिइन्धी दीप्तौ इन्द्धे इन्धीत ऐंद्ध इन्धाञ्चक्रे ऐन्धिष्ट खिद दैन्ये
खिन्ते खित्सी ष्ट अखित्त विद विचारणे विन्ते वित्सीष्ट अवित्त इतिरुधादयः तनुविस्तारे तनादेरूपूकर्त्तरि चतुर्षु नूपः तनोति तनुतः
तन्वन्ति ओर्मोर्वा लोपः तनुवः तन्वः तनुते तनाते तन्वते तनुः तेने अतानीत् अतनीत् तनादेस्तथासोर्वासेर्लुक् लोपूर्व... तानतनाम् अ
तत अतनिष्ट अतथाः अतनिष्ठाः षणुदाने सनोति सनुते सेनतुः सेने जनसनखनामात्वमितिसायात् सन्यात् असात असत निष्ट असाथाः
अप्रोपवादः तनोति तनुते तनुयात् तन्वीत तनोतु तनुतां अतनोत् अतनुत ततान तेने तन्यात् तनिषीष्ट तनिता तनिष्यति तनिष्यते अं असनिष्ठाः॥
तनिष्यत् अतनिष्यंत अतो हलादेर्लघोरिति वा वृद्धिः अतनीत् अतानीत् तनादेस्तथासोर्वा सेर्लुक् तनादेः परस्य सेर्लुग्वा भवति तनियासि च परे अतत अतनिष्ठ = राम
षणुदाने नोतो यं णकारस्तु लाक्षणिकः तेनयङ्लुकि ...सन्निसंसनः इत्यादावनुस्वारपरसवर्णौ स्तः जनसनेन्यात्वं सायात् सन्यात् असात असनिष्ट असाथां असनि ३९

न

मी नातिमिनोतीत्यात्वं ओनोणवित्यौकारः ममौनुधातोरिति यः मिम्यतुः यमिरमीतीट् सकौ अमासीत् चिञ् चयने चयनं रचनाविशेषः चिनोते सणादौ कि
र्वा चिनोतेः किरादेशः स्यात् लिटि सन्प्रत्यये च सेपरे चिकीषति चिचीषति णादौ तु चिकाय चिचाय गुणोर्त्तिसंयोगाद्योरिति गुणः तस्तरतुः तस्तर्याक्त्र ऋदंतान् संयोगादेः
रिस्योरिड्वा ति ऋदंतान्संयोगादेर्ह्लोनोः परयोः सिस्योरिड्वा स्यादात्मनेपदे परे स्तरिषीष्ट उरिति न गुणः स्तृषीष्ट क्रादि नियमादिण् न च कर्थयादादौ पेइति रिङ् क्रिया।

मी नातिमिनोतीत्यात्वम् ममौ मिम्यतुः ममिथ ममाथ मिम्ये अमासीत् अमास्त चिञ् चयने चिनोति चिनोते स्सणादौ किंर्वा चिकाय
चिचाय चिच्यतुः अचैषीत् अचेष्ट स्तृञ् आच्छादने स्तृणोति स्तृणुतेः स्तृणवनितस्तार गुणोर्त्तिसंयोगाद्योः तस्तरतुः ऋदनोन्त्य पोःनेटतस्त्रा
र्थ तस्तरे स्तर्यात् ऋदन्तात्संयोगादेः सिस्योरिड्वा ति स्तरिषीष्ट स्तृषीष्ट अस्तार्षीत् अस्तरिष्ट अस्तृत लोपो ह्रस्वान्मसे कृञ् हिंसायाम् कृ
णोति कृणुते चकर्थ चकृव चकृवहे अकार्षीत् अकृत वृञ् वरणे ववार ववरतुः वृञस्य पदट्ववरिथ ववृढ्‌ वृञ् ऋदन्तान्सिस्योरिड्वा ति वरिषीष्ट वृषी
ष्ट वरिता वरीता वरिष्यति वरीष्यति अवारीत् अवारिष्टाम् अवरिष्ट अवरीष्ट अवृत धुञ् कम्पने धुनोति धुनुते दुधाव दुधुव
तुः धोष्यति अधौषीत् अधोष्ट दीर्घान्तोप्यय धुनोति सुसुधूञामितीट् अधावीत् स्वरतिसूतीतिवेट् अधविष्ट अधोष्ट बालु
मयपदिनः दुदु उपतापे दुनोति दुदाव दुदुव ... हिनोत्युद्दौ च हिनोति ॥ तु उरिति न गुणः हृषीष्ट वृञः स्य पदट्ट वृञः परस्य पदट्टस्या
नववरिथ ववृढ्‌ वृञ् ऋदंतान् सिस्योरिड्वा ति वृढ्‌ वृञ्भ्यां ऋदंतात् परस्य सिप्रत्ययस्य सीयुडादेश्वेड्वा स्यात् आत्मनेपदे परे पसे रिटो न दीर्घः सीयुडादेरिति न दीर्घः वा
रिषीष्ट वृढ्‌ वृञ्जितिवा दीर्घः वरीता वरिता स्वरतिसूतीति वेट् दुधुविथ दुधोथ किति लिटि तु किन्नद्तीण् निषेधं वाधित्वा क्रादि नियमान्नित्यमिट् नानयोरित्युवृद्दधुवि

पूर्वात् हिनोतेर्हस्य घो न त्वङि द्वित्वे सति पूर्वात् परस्य हिनोतेर्हस्य घः स्यात् अङि तु न अङि किम् अजीहयत् संयोगपूर्वकत्वात् ओर्वाद्देरिति न हेर्लुक् आप्नुहि
राधो हिंसायामेत्वपूर्वलोपौ किति लिटि सेटि थलि च हिंसार्थकस्य राधः एत्वपूर्वलोपौ स्तः नान्यार्थकस्य दंभु दंभे लोकवंचनाय विहितकर्मानुष्ठानं दंभः श्रंथिग्रं

पूर्वाद्धिनोतेर्हस्य घो न त्वङि जिघायजि[illegible]षु आप्लृ व्याप्तौ आप्नोति आप्नुवन्ति आप्नुहि आप आपतुः आप्ता आप्स्य[illegible]
शक्लृ शक्तौ शक्नोति शशाक शेकतुः शक्ता अशकत् राध साध संसिद्धौ राध्नोति राध्नुवन्ति राधो हिंसायामेत्वपूर्वलोपौ किति लिटि सेटि थलि
पि च रराध रेधतुः रेधिथ अरात्सीत् जिधृषा प्रागल्भ्ये धृष्णोति दधर्ष अधर्षीत् दम्भु दम्भे दभ्नोति श्रन्थिग्रन्थिदम्भिभ्यो लिटः कित्वं वा।
स्यात् दम्भेर्लिट्येत्वपूर्वलोपौ ददम्भ देभतुः ददम्भतुः देभिथ ददम्भिथ अदम्भीत् ऋधु वृद्धौ आनर्ध नुगशाम् आनृधतुः अर्धिता क्षि हिंसा
यां क्षिणोति क्षिण्वन्ति क्षेता ॥ ॥ इति पम् ॥ अशू व्याप्तौ संघाते च अश्नुते नुगशाम् आनशे अशिषीष्ट अक्षीष्ट अशिष्ट
अष्ट आशिष्ट आक्षाताम् ष्टिघ आस्कंदने स्तिघ्नुते स्तिघ्नुवाते तिष्टिघे अस्तेघिष्ट ॥ ॥ इति स्वादयः ॥ ॥

न्थि दंभिभ्यो लिटः कित्वं वा एभ्यः परस्य लिटः कित्वं स्यात् श्रंथ ग्रंथ संदर्भे दंभु दंभे दंभः किति लिट्येत्वपूर्वलोपौ श्रेथीति कित् संज्ञायां नो लोप इति नलोपस्य
स्यासिद्धत्वादेत्वपूर्वलोपयोरप्राप्तौ तस्यामारंभः इति पन्नुगशामिति नुक् आनशे ष्टिघ आस्कंदने आस्कंदनं संग्रामः स्तिघ्नुते इत्यादि ॥ ॥ इति स्वादयः ॥

क्षणु क्षिणु हिंसायां इमाव पिल्ला क्षणिकौ नकारौ तेन क्षस्वन्निक्षेस्वंन्नी इत्यत्रानुस्वारपरसवर्णौ स्यं ते जिन वृद्धिः अक्षणीत् तनादेस्तथासोरितिवासेर्लुक् लोप
स्तु दात्ततनामितिनलोपः अक्षत अक्षनिष्ट तनादेरूपधाया गुणो वापितनु षणु क्षणु धात्वंशांगुणासंभवात् क्षिणुप्रादिस्त्वस्य प्रवृत्तिर्बोध्या उवमिति वं कुर्वन्ति कुरस्तु ।

क्षणु क्षिणु हिंसायाम् क्षणोति हम्यन्त क्षणोति न वृद्धिः अक्षणीत् अक्षत अक्षणिष्ट अक्षथाः तनादेरूपधाया गुणो वा पिक्षिणोति क्षेणोति
अक्षेणीत् अक्षित अक्षेणिष्ट अक्षिथाः अक्षेणिष्ठाः ऋणु गतौ ऋणोति अर्णोति ऋणुतः आनर्ण आनृणे आर्णीत् आर्त आर्णिष्ट आर्थाः आर्णिष्ठाः
तृणु अदने तृणोति तर्णोति तृणुते तर्णुते अतर्णीत् अतृत अतर्णिष्ट अतृथाः अतर्णिष्ठाः घृणु दीप्तौ घृणोति घर्णोति जघर्ण अघर्णीत् अघृ-
त अघर्णिष्ट अघृथाः अघर्णिष्ठाः डुकृञ् करणे करोति डित्त्वाद् उः कुरुतः कुरुन्तु रोर्न दीर्घः कुर्वन्ति कृञो नित्यं वमोरुल्लोपः कुर्वः कुर्म्मः कृञो येक्ष
उ प्रत्ययस्य लोपोपि ये कुर्य्यात् चकर्थ क्रादेर्नेट् क्रियात् कृषीष्ट अकार्षीत् अकृत अकृथाः संपर्युपेभ्यः करोतौ भूषणे सुट् सं
स्करोति अट् व्यवधानेपि सुट् समस्करोत् संचस्कार ससुटः कृञो लिटइट् सञ्चस्करिथ संचस्करिव संस्क्रियात् संस्कृषीष्ट एवं परि
रिष्करोति उपस्करोति परिष्करिष्यते पर्य्यस्कार्षीत् पर्य्यष्कार्षीत् सिवादेरिति वा षः इत्यात् वनु याचने वनुते ववने परस्मैपद्ययमित्येके वनोति श
सदद इति ववान ववनिथ अवानीत् अवनीत् मनु अवबोधने मनुते मेने मनिषीष्ट अमत अमनिष्ट ॥ रोर्दीर्घः कृञः कुरु रूपस्य कुर छेदने इत्यस्य चदी
र्घो न भवति कुर शब्दे इत्यस्य तु न निषेधः कृञो नित्यं वमोरुल्लोपः कृञः परस्य उप्रत्ययस्य लोपः स्यात् वमयोः परयोः कृञो येलोप इत्यनुवृत्तं आशिषि यादादौ ये इति रिङ्
क्रियात् उ विति न गुणः कृषीष्ट तनादेरिति सेर्लुगभावे लोपो ह्रस्वादिति सिलोपः अकृत संपर्युपेभ्यः करोतौ भूषणे सुट् संपर्युपपूर्वस्य करोतेः सुट् स्यात् भूषणे संघे चार्थे सं

सि.कौ.तनादिकृञ्भ्यः उः ॥

भवति
भवति इत्यु
यपत्र
विधीयते
नाम तः इति

अ॰
सि॰ च॰
उ॰
४०

संस्कुर्वंतिसंघीभवंतीत्यर्थः अड्व्यवधानेपिकात्पूर्वः सुट् संपर्युपेभ्यः परस्यकृञोड्व्यवधानेद्वित्वव्यवधानेचकात्पूर्वः सुट् भवतिसमुटः कृञोलिट्द्वित्वम्
ट्सहितात्कृञःद्वित्वंभवति॥ इतितनादयः तुदव्यथनेतुदादेःतुदआदिर्यस्यसतुदादिः तस्मादप्रत्ययःस्यात्कर्त्रर्थेषुचतुर्षु शपोपवादः तुदतितुदतेतुदेततुदेत
तुदतुतुदतांअतुदत् अतुदत्तुतोदेतुतुदेततुदानतुत्सीष्टसिस्योरितिनगुणः नोत्तां तोत्स्यतितोत्स्यतेअतोत्स्यत् अतोत्स्यतअतौत्सीत्झलादितिसिलोपः अतु
त्तदिशअतिसर्जनेअतिसर्जनंदानदृशांतातस्मगितिसझ्लशषेतिषत्वंढत्वंढोढेइतिकत्वंचअदिक्षत्अदिक्षतभ्रस्जपाकेभर्जनरूपःपाकोत्रधात्वर्थोनत्वोदनादेःपाक
स्तत्रप्रयोगाभावात्ग्रहामितिसंप्रसारणंसस्यश्चुत्वेनशःझलांजश्भष्वेजबाइतिजःभृज्जतिभृज्जेतभृज्जेतभृज्जतुभृज्जतांअभृज्जतअभृज्जतभ्रस्जोरोपधयोरमनपि

इतितनादयः तुदव्यथनेतुदादेःकर्तरिचतुर्षुतुदतितुदते तुत्सीष्ट अतौत्सीत् अतुत्तणुदप्रेरणे नुदति नुत्सीष्ट अनौत्सीत् अनुत्तदि
श अतिसर्जने दिशति दिक्षीष्ट अदिक्षत् भ्रस्जपाके ग्रहांक्ङितिच भ्रस्जेजवाः भृज्जते भ्रस्जोरसोपधयो[illegible]नपिवा बभर्ज बभ्रज्ज बभर्जतुः बभ्रज्जतुः ब
भर्जिथ बभ्रज्जिथ बभर्ष्ठ बभ्रष्ठ स्वरानादस्वत इत्येति वेट् ङ्किति संप्रसारणं बाधकम् भृज्ज्यात् अभ्राक्षीत् अभार्क्षीत् अभ्रष्ट अभर्ष्ट क्षिपप्रेरणे
क्षिप्सीष्ट अक्षैप्सीत् अक्षिप्त कृषविलेखने कृक्षीष्ट क्रष्टा कर्ष्टा अक्राक्षीत् अकार्क्षीत् अकृक्षत् अकृक्षाताम् अकृक्षन् मिलसंगमे मिलति मि
मिले अमेलीत् अमेलिष्ट मुच्लृमोचने ॥ वाभृज्जेरेफस्योपधायाश्चस्थानेरमागमोवास्यात् अनपिमित्वादंत्यात्स्वरात्परोभवतिस्थानषष्ठीनिर्देशात्
रकारोपधयोर्निवृत्तिः बभर्ज बभ्रज्ज बभर्जतुः बभ्रज्जतुः थपिवभर्जिथ स्वरांतादस्वतइत्येतिवेट् बभ्रज्जिथस्कोरितिसलोपः व्रश्चेतिषः बभर्ष्ठ बभ्रष्ठ आर्ति
बभर्ज बभ्रज्जेक्ङितिरमागमंबाधित्वासंप्रसारणंभृज्ज्यात् भर्क्षीष्ट भ्रक्षीष्ट भर्ष्टा भ्रष्टा भक्ष्यति भ्रक्ष्यति भर्क्ष्यते भ्रक्ष्यते अभर्क्ष्यत् अभ्रक्ष्यत् अभर्क्ष्यत अभ्रक्ष्यत अभार्क्षीत् अभ्राक्षी
त् अभर्ष्ट अभ्रष्ट कृषविलेखने कृषादीनांवेतिवाऽमः क्रष्टा कर्ष्टा सिस्योरितिनगुणः कृक्षीष्ट कृषस्पृशेतिवासिः अनिटो नामिवतइतिवृद्धिः अकाक्षीत् अकार्क्षीत् पक्षेहश
॥षांतादितिसक् अकृक्षत् सिस्योरितिनगुणः अकृष्टसकि ॥ ॥

संप्रसारणं तदाश्रयं
चकार्यं बलवत् संप्र
सारणं शुद्धं

मीनाति मिनोति दीङां गुणवृद्धि विषये क्यपि चात्वम् एषामात्वं स्यात् गुणवृद्धि विधायके प्रत्यये क्यपि च मीः ॥ [illegible] यां म् डुमिञ् प्रक्षेपणे दीङ् क्षये घञि उपादायः न
ल्यप्रत्यये प्रमानव्यम् लुङि अदास्तेत्यत्रापि द्वाधास्या मितीत्वं न दीङोऽनुकरणे दारूपासंभवात् डीङ् विहायसा गतौ आकाशेन गमने डीनः डीनवान् डीङः स्वा
दिषु पाठसामर्थ्यात् क्तक्तवत्वो रिडान दृष्टिमति व्यवधानात् ल्वाद्योदितश्चेति न त्वं न स्यात् दूत्यर्थः मीङ् प्राणवियोगे मीयते प्राणैर्वियुज्यते इत्यर्थः लीलीङोरात्वं वा गुण
वृद्धि विषये क्यपि च अनयोरात्वं वा स्यात् गुणवृद्धि विधायके प्रत्यये क्यपि च परे लीश्लेषणे क्र्यादिः लीङ् श्लेषणे दिवादिः क्यपि विलाय विलीय व्रीङ् वरणे वरणं मंगी

मीनाति मिनोति दीङां गुणवृद्धि विषये क्यपि चात्वम् दासीष्ट दाता दास्यते अदास्त डीङ् विहायसा गतौ डीयते डयिष्यते अडयिष्ट धीङ् धार
णे धीयते दिध्ये दिध्यिध्वे अधेष्ट मीङ् प्राणवियोगे मीयते मेता रीङ् स्रवणे रीयते रेष्यते अरेष्ट लीङ् श्लेषणे लीयते लिल्ये [illegible] नीलीङो [illegible] त्वमा
गुणवृद्धि विषये क्यपि च लाता लेता अलास्त अलेष्ट व्रीङ् वरणे व्रीयते विव्रिये व्रेष्यते अव्रेष्ट स्वादय ओदितः पीङ् पाने पीयते अपेष्ट माङ् मा[illegible] षधे
ते ममे अमास्त अमासाताम् ईङ् गतौ ईयते अयाञ्चक्रे प्रीङ् प्रीतौ प्रीयते पिप्रिये अप्रेष्ट जनी प्रादुर्भावे ज्ञाजनोर्जा कर्तरि चतुर्षु जायते गमां [illegible] जज्ञे
जनिता दीपजनेति इण् जनिवध्योर्न वृद्धिः अजनि अजनिष्ट तूरी गतित्वरणहिंसनयोः तूर्यते तुतूरिषे दीपी दीप्तौ दीप्यते अदीपि अदीपिष्ट पूरी आ
प्यायने अपूरि अपूरिष्ट तप ऐश्वर्ये तप्यते [illegible] प्त अतप्त वा [illegible] तु वरणे वावृत्यते वावर्ताञ्चक्रे पद गतौ पद्यते पेदे पत्ता पदेरिण् [illegible] अपादि अपत्साताम्
मू खिद दैन्ये खिद्यते खेत्ता विद सत्तायाम् विद्यते वि[illegible] बुध अवगमने बुध्यते भुत्सीष्ट दीपजनेति इण् अबोधि अबुद्ध युध सम्प्रहारे युध्यते
कारः व्रीवरणे क्र्यादिः स्वादयः ओदितः इति न क्तक्तवत्वोः सस्य नत्वं ल्वाद्योदितः इत्यनेन वक्ष्यते प्रीङ् प्रीतौ सकर्मकः ज्ञाजनोर्जा अनयोर्जा ((युयुधे युत्सीष्ट अयु
देशः स्यात् चतुर्षु ज्ञा अवबोधने जनी प्रादुर्भावे चतुर्षु किम् ज्ञाता दीपजनेतीणू वा अजनि वा वृतु वरणे ततो वावृत्यमाना सा रासभ्याः [illegible] क्षतेति भट्टिः पदेरिण् तनि
पदेरिण् प्रत्ययः स्यात् कर्त्रर्थे तनि परे अपादि दीपजने इतीण् वा लुगिति तनो लुक् अबोधि मुसादि तिसिलोपः अबुद्ध आदि जवा मितिभः अभुत्साताम् ॥ ॐ ॥

श्री॰
सि॰ चं॰
उ॰
३२

अनोरुधकामे अनूपसर्गात् परो रुध धातुरिच्छायामस्ति दिवादिपाठसामर्थ्यात् रुधादेरिति नमं वाधित्वा यः युज् समाधौ समाधिश्चित्तवृत्तिनिरोधः अकर्मकः
सृज विसर्गे अकर्मकः संसृज्यते सरसि जैरहणांशुभिन्नैरिति सिस्योरिति न गुणः सृक्षी सृक्ष्व शषेति षत्वं ष्टुत्वं मृ सादिति सिल्लोपः असृष्ट लिश अल्पीभावे अनल्प
स्याल्पत्वेन भवनमल्पीभावः सिस्योरिति न गुणः क्ष शषेति षत्वं षढोरिति कत्वं लिक्षी ष्ट लुङि हस घांतादिति सकृ अलिक्षत इत्यात् इ शुचिर् क्लेदे आदीदित इ

अनो रुधकामे अनुरुध्यते अनुरुरुधे अनुरोद्धा अनुरोत्स्यते अन्वरुद्ध मन ज्ञाने मन्यते मेने मेनिषे मन्ता अमंस्त युज समाधौ यु
ज्यते योक्ता अयुक्त सृज विसर्गे सृज्यते ससृजे सस्रक्षे स्रष्टा असृष्ट असृक्षातां लिश अल्पीभावे लिश्यते लिलिशे लेष्टा अलिक्षत उ लि
क्षाताम् इत्यात् मृष तितिक्षायाम् मृष्यति मृष्यते ममर्ष ममृषे अमर्षीत् अमर्षिष्ट ई शुचिर् क्लेदने शुच्यति शुच्यते अशुचत् अशोचीत् अशोचि
ष्ट रञ्ज रागे अपि रञ्जदंशेति नलोपः रज्यते रज्यति अराङ्क्षीत् अरङ्क्त शप आक्रोशे शप्यति शप्यते शेपतुः शेपे शप्ता अशाप्सीत् अशप्त
मर्षणे शेकिथ शशकु पुषादित्वात् ङः अशकत् अशक्त सेट् कोऽयमित्येके शकिता णह बन्धने नह्यति नह्यते ननाह नेहिथ ननद्ध नत्सी ४ नद्धा
अनात्सीत् अनद्ध इति दिवादयः षुञ् अभिषवे ३६ स्वादेर्नुः कर्तरि चनुर्नु श्नुः नु प्रत्ययस्य उप्रत्ययस्य च गुणो भवति पिति सुनोमि सु
नुते ओर्वलोपः सुन्वः सुनुवः सुनोतु ओर्वा हेः सुनु सुनवानि सुनवै असुनोत् असुनुताम् सुषाव सुषुव गुः सोढः असावीत् सुसुधू
नाप से सेरि ट् असोष्ट षिञ् बन्धने सिनोति सिनुते सिष्ये सिष्यात् असैषीत् असेष्ट शिञ् निशाने शेता अशेष्ट अशैषीत् डुमिञ् प्रक्षेपणे ॥ तिनेट् शुक्त
मृक्लिवं इति इति वाडः असुचत् स्वरान्तादत्वत श्वेति वेट् नेहिथ नह इति धः तयोरिति थस्य धः ननह अन उपधाया इति वृद्धिः अनात्सीत् इत्यात्ये इति दिवादि ॥६९॥ रामः ३२
गणः षुञ् अभिषवे स्नपनं स्नानं पीडनं सुरासंधानं वाभिषवः स्नाने ऽकर्मकः स्वादेर्नुः सुरादिर्यस्य सः स्वादिस्तस्मात् नु प्रत्ययः स्यात् कर्त्रर्थे षु परे षुनूपः उपासाहच
र्यान्नुप्रत्ययस्य व ग्र स्वतेन धातुः हुश्नुवोरिति वः सुन्वं तिर्ओर्वमोरित्युकारलोपो वा सुन्वः सुनुवः ओर्वा हेरिति हेर्लुक् सुनु सुनानयोरित्युव सुषुवे सुसुधूजामिती द्र असा

धिनला
प्राप्ते।
रयाप्रि
धिरारभ
ते स॰त॰
स्यापना
१:८

दीपि॰

शमां दीर्घः शमादीनामष्टानां दीर्घः स्यात् श्ये परे लोपः पचामित्येत्व पूर्वलोपौ शेमतुः दमुशमनायामकर्मकः भ्राशभ्लाशीति योवा भ्राम्यति भ्रमति फणरजद्र
त्येत्वपूर्वलोपौ वा भ्रेमतुः क्षमूसहने नायं षित् भ्वादिस्तु षित् अषितः क्षाम्यतेः क्षांतिः क्षमूषः क्षमतेः क्षमा ऊदित इति वेट् चक्षमिथ चक्षंथ मोनो धातोरिति।
मस्य नत्वे णत्वे चचक्षस्व क्लमुग्लानौ अपीवयप्रत्यये पि ष्ठिवुक्लम्वाचमामित्येव दीर्घसिद्धे शमादिपाठः शमादिश्यन् इति विकरणार्थः अस्यतेस्थुकू ङे असेः थुगाग

शमान्दीर्घः शमादीनान्दीर्घः कर्तरि श्ये शाम्यति शमिता अशमत् तमुकांक्षायाम् ताम्यति तताम तेमतुः अतमत् दमुशमने ... याम् दा
म्यति देमतुः अदमत् श्रमुतपसि खेदे च श्राम्यति शश्राम शश्रमतुः अश्रमत् भ्रमु अनवस्थाने भ्राम्यति भ्रमति बभ्राम भ्रेमतुः बभ्रम
तुः अभ्रमत् क्षमूसहने क्षाम्यति चक्षमिथ चक्षन्थ अक्षमत् क्लमुग्लानौ भ्राशभ्लाशेति योवा क्लाम्यति ष्ठिवुक्लम्वाचमान्दीर्घ ... षा
क्लामति मदी हर्षे माद्यति ममाद अमदत् शमादयोऽष्टौ असु क्षेपणे अस्यति असेत् आस आसतुः आसिथ अस्यतेस्थुकू ङे आस्थ ... ति
प्रपत्ते अनुपसर्गाद्यसः समस्तम्पूर्वाच्च योवा यस्यति यसति संयस्यति संयसति ययास येसिथ अयसत् उपसर्गे तु प्रयस्यति जसु मोक्षणे जस्य
ति जजास जेसिथ अजसत् तसु दसु उपक्षये तस्यति दस्यति ददास देसिथ अदसत् वसुस्तम्भे वस्यति ववास ववसतुः अव ...
विस प्रेरणे विस्यति विवेस अविसत् कुश ... कोशिता अकुशत् बुस उत्सर्गे बुस्यति बुबोस बोसिता अबुसत् मुस
खण्डने मुस्यति मोसिता अमुसत्॥

मः स्यात् ङे परे असेः पुषादित्वात् ङ प्रत्यये सिद्धे अस्यति वक्ष्यतीति वचनमात्मनेपदार्थं उपसर्गादस्यत्यूह्योरित्या
त्मनेपदं वक्ष्यते पर्यास्यत अनुपसर्गाद्यसः संपूर्वाच्च योवा अनुपसर्गात् संपूर्वाच्च परस्य श्यप्रत्ययो वा स्यात् वादित्वान्नेत्वपूर्वलोपौ ववसतुः बुस उत्सर्गे उत्सर्गस्त्यागः

मसीसमीपरिणामेपरिणामोविकारः द्रुषुसहेतिनिवेट् रोषितारोष्टा लुष्यतींसिद्धकः अनिट्कारिका सुलिपिसा ह्यचर्यात् तौदादिकस्यैव ग्रहणात् इषुसहेतिवेट् लोभि
तालोब्धामिदेर्गुणोयेमिदेर्गुणः स्यात् दिवादिविकरणेयेपरे नुगशामिनितुकू आ नर्द इतिपरस्मैपदम् षूङ् प्राणिप्रसवेप्रसव उत्पत्तिः मृत्पिंडोघटं सूयते इत्यादि

मसीसमीपरिणामे मस्यति मेमसिथ अमसत् लुठ विलोडने लुठ्यति लोठिता अलुठत् उच् समवाये उच्यति उवोच ऊचतुः औचत् भृशु भ्रं
शु अधःपतने भृश्यति वभर्शिथ अभृशत् भ्रश्यति ... अभ्रशत् वृश वरणे वृश्यति ववर्शिथ अवृशत् कृश तनूकरणे कृश्यति चकर्शिथ
अकृशत् ञितृषू पिपासायाम् तृष्यति ततर्षिथ अतृषत् हृष तुष्टौ हृष्यति जहर्षिथ अहृषत् रुष रिष हिंसायाम् रुष्यति रोषिता रो
ष्टा अरुषत् रिष्यति रेषिता रेष्टा अरिषत् डिप क्षेपे डिप्यति अडिपत् कुप क्रोधे कुप्यति अकुपत् गुप व्याकुलत्वे गुप्यति अगुपत् युप
रुप लुप विमोहने युप्यति युयोपिथ अयुपत् रुप्यति रुरोपिथ अरुपत् लुप्यति लुलोपिथ अलुपत् लुभ आकांक्षायाम् लुभ्यति लुलोभिथ लो
भिता लोब्धा अलुभत् क्षुभ संचलने क्षुभ्यति चुक्षोभ अक्षुभत् क्लिदू आर्द्रीभावे क्लिद्यति चिक्लेद क्लेत्ता अक्लिदत् ञिमिदा स्नेहने मिद्यति मे
दति मिमेद मिद्यात् अमिदत् ञिक्ष्विदा स्नेहनमोचनयोः क्ष्वेदिता अक्ष्विदत् ऋधु वृद्धौ ऋध्यति आनर्ध्य आनर्ध ऋध्यात् आर्धत् गृधु अ
भिकांक्षायाम् गृध्यति जगर्धिथ अगृधत् इति पुषादयः इति परस्मैपदम् षूङ् प्राणिप्रसवे सूयते सुषुवे सुषुविषे सविता असविष्ट दूङ्
परितापे दूयते दुदुवि दुदुविध्वे अदविष्ट दीङ् क्षये दीयते दीङो युट् क्ङितः स्वरस्य दिदीपे ... प्रयोगाभावात् प्राणीत्युक्तं स्वादयजेदितः इति परस्मै
पदं वक्ष्यमाणत्वात् ल्वादयोदितः श्वेति न त्वं प्रसूतं ना नष्टोरित्युवसुंवेस्वरतिसूतीति विकल्पं बाधित्वा कित इट् गीण निषेधेप्राप्ते क्रादिनियमान्नित्यमिट् सुषुवि
षे दीङो युट् क्ङितः स्वरस्य दीङः परस्य स्वरादेः क्ङितः प्रत्ययस्य युट् स्यात् स्वरादेः किं देदीय्यते क्ङितः किं उपादानं ॥ ॥ सोत्ता ४

अप्रतो ४
एम
३६

राधोऽकर्म्मकादेवयः अकर्म्मकाद्राधेर्यप्रत्ययः स्यात् सकर्म्मकात्तु नयन्न स्वमपराध्यति दुह्यतीत्यर्थः विराध्वं तं समेन कः दुह्यं नमित्यर्थः राध्यत्योदनः सिध्यती
त्यर्थः अकर्म्मकात् किं शत्रुमपराध्नोतिहिनस्तीत्यर्थः राधसंसिद्धौ हिंसायां च स्वादिश्चुरादिश्चायम् राधो हिंसायामित्यनेनैव पूर्वं लोपा विहन हिंसार्थकस्य सकर्म्मक
कतयादेवादिकत्वाऽयोगात् ग्रहमिति सम्प्रसारणं विध्यति स्निपुषादेरितिङः अपुषत् पथेऽरितिकत्वं पथं च शोष्यति श्लिषेरालिंगने सक्‌ अनिटः श्लिषेः स
क्‌प्रत्ययः स्यात् आलिंगनेऽर्थे नान्यत्र प्राणिकर्तृकमुपगूहनमालिंगनम् लिपुषादेरित्यस्यापवादः अनिटः किम् श्लिषदाहेइति सेद्धेः श्वादिकस्यमा
भूत् अश्लेषीत् ह्रशयांनादिति सकि सिद्धे पुनःसको विधानं नियमार्थम् तेनकर्म्मणि आन् प्रभृतिषु परतोऽनालिंगने सिरित्वन्तृतुशक्नुयथा दूणत्तनीतीण् अ

राधोऽकर्म्मकादेवयः राध्यति रराधिथ राद्धा रात्स्यति अरात्सीत् व्यधताडने ग्रहांङ्गिति च विध्यति विव्याध विविधतुः विव्यधिथ
विव्यद्ध व्यद्धा अव्यात्सीत् पुषपुष्टौ पुष्यति पुपोषिथ पोष्टा पोक्ष्यति पुषादित्वात् ङः अपुषत् शुषशोषणे शोष्टा शोक्ष्यति अशुषत् तुष्
त्रि तुष्टौ तोष्टा तोक्ष्यति अतुषत् दुषवैकृत्ये दोष्टा अदुषत् श्लिषआलिंगने श्लेष्टा आलिङ्गने श्लिषेस्सकुडोऽपवादः अश्लिक्षत्कन्यां चैत्रः
अनालिङ्गने तु समश्लिषत् जतुकाष्ठम् षिदागात्रप्रक्षरणे स्वेत्ता अस्विदत् क्रुधक्रोधे क्रोद्धा अक्रुधत् क्षुधबुभुक्षायाम् क्षोद्धा अक्षुधत्
शुधशौचे शोद्धा अशुधत् षिधुसंराद्धौ सेद्धा लोपश्च रधहिंसायाम् रध्यति ररन्ध ररन्धतुः ररन्धिथ ररद्ध ररन्धिव रेध्व ररन्धिम रध्यम॥

श्लेषि अश्लिक्षातां अश्लिक्षत् अश्लिक्षाः अश्लिक्षाथाम् अश्लिड्ढ्वम् अश्लिक्षि अश्लिक्षावहि अश्लिक्षमहि त्रिष्विदा गात्रप्रक्षरणे गात्रप्रक्षरणं घर्म्मस्रुतिः श्री
दितिन्यासकारः नेति हरदत्तः श्रीतां नकुवर्त्तमाने पीजितक्तु आदीदित इति नेट् स्विन्नः भावकर्त्रोरिचादितइतीड्वा स्विन्नम् स्विदितं क्षुधबुभुक्षायाम् मोक्षुमिक्षुधा
बुभुक्षा जनिडयं कथं नहि क्षुधितइति किवंतादितो जातार्थं इतीत्प्रत्ययइति माधवः वसुनक्षुवसिक्षुधोरिडितिवक्ष्यते षिधुसंराद्धौ संराद्धिर्निष्प
त्तिः उदितः त्वावेतिक्त्वाप्रत्ययेइड्विकल्पः सिद्धा इदृपक्षेइवर्णावर्णोपधाद्वेसादेरितिवाकित्वं सेधित्वासिधित्वा रधिजमोः स्वरेइति·

श्री सि॰ च॰ उ॰ ३५

नुम् ररंधनुमिक्कृते संयोगान् परत्वेनाकित्वात् नलोपोन ररंधतुः स्वरतिसूतीतिसूत्रे रधादिष्टकोऽवांतरगणोऽज्ञेयस्तेन गण निर्दिष्टत्वाद्यङ्लुकिनवेट् रा
रधिता स्वरतीतिवेट् ररंधिथ ररद्धलोपः पचामित्येव पूर्वलोपो रेधुवद्रूपक्षे ररंधिव ॐ लिड्वर्ज्जेद्रुटि रधेर्नुम् रधिर्नुम् नस्यात् ड्डिपरे लिट्समं वधिनी
टित्तु नुमस्या देवट् टिकिं रंधकः लिनुषादे रितिङः नुम् नोलोपइतिनस्य लोपः अरधत् मस्जिनशोर्झसेनुम् अनर्य ॓नुम् स्यात् झसे परे द्रुमस्जोश्रुद्धोणश
अदर्शने कुशावेति षत्वं कुत्वं ननंष्ट नंशे रितिकत्व मि॰ नेअं॰ पदांतस्यहाद्विधानात् अन्यथा नष्टं नष्टिरित्यादिनसिध्यतितृपप्रीणने प्रीणनं तृप्तिस्तर्पणंचा

लिड्वर्ज्जितेइटिरधेर्नुम् रधिता रद्धा राधिष्यति रध्यति अरधत् णशअदर्शने नश्यति ननाश नेशतुः नेशिथ मस्जिनशोर्झलि नुं
ननंष्ठ नेशिव नेश्व नेशिम नेश्म नशिता नंष्टा नशिष्यति नङ्क्ष्यति अनशत् तृपप्रीणने तृप्यति ततर्पिथ ततर्प्थ ततर्पिथ तत्रप्थ
ता त्रप्ता तर्प्ता तर्पिष्यति त्रप्स्यति तर्प्स्यति अतृपत् अतर्पीत् अत्राप्सीत् अतार्प्सीत् दृपहर्षगर्वयोः दृप्यति अद्राप्सीत्
दृपत् द्रुहजिघांसायाम् दुद्रोहिथ दुद्रोढ दुद्रोग्ध दुद्रुहिव दुद्रुह्व दुद्रुहिम दुद्रुह्म द्रोहिता द्रोग्धा द्रोढा द्रोहिष्यति ध्रोक्ष्यति
अद्रुहत् मुहवैचित्ये मुह्यति मुमोहिथ मुमोढ मुमोग्ध ष्णुह उद्गिरणे स्नुह्यति सुष्णोहिथ सुष्णोढ सुष्णोग्ध ष्णिह प्रीतौ स्निह्यति सिष्णेहिथ

नाग्निस्तृप्यति काष्ठानां करणस्य संबंधविवक्षायां षष्ठी दृन् अतार्प्सीत् इत्युभयत्र दर्शनात् स्वरतीति वेट् ततर्पिथ कृषादीनां सिष्णेढ सिष्णेग्ध शमु उ
मितिवारः ततर्प्थ तत्रप्थ कृष स्पृश मृश तृप दृपामिति वा सिः अतर्प्सीत् इड भावे अनिटो नामिवत इति वृद्धिः अतार्प्सीत् रत्वे अत उपधाया इति पुन
र्वृद्धिः अत्राप्सीत् अतृपत् दृपहर्षमोहनयोः मोहनं गर्वः मुहवैचित्ये वैचित्यमविवेकः दुहादेरिति घत्व ढत्वे नथोरिति थस्य धत्वं क्वेट् तिगः मुमोग्ध कृत्वे ढि ढ इ
ति ढलोपः मुमोढ मुमोहिथ लुटि घत्व ढत्वयोस्तु त्यं रूपं स्वसे इति षढोरिति चकत्व विधानात् मोक्ष्यति शमु उपशमे उदित्वात् क्त्वा प्रत्यये वेट् शमित्वा शांत्वा क्वचिदिट् इति

राम ३५

तनेः स्यादौ सेवा दीर्घः अनिटि सिसि तितांसति दरिद्रातेर्गतौ पततनेति वेट् दरिद्रातेरनप्यालोपः सौवेत्यालोपे षत्वे च दिदरिद्रिषति दंभिज्ञपिभ्यां सस्येवेट् यः से इति पूर्वस्येत्
दिदंभिषति इट्भावे दंभेरिच्च दंभेः स्वरस्य इस्स्यात् ईच्च पूर्वस्य लोपश्च अनिटि मेड् पधानस्य लोपः इति न लोपः आदिजवानामिति धत्वं धिप्सते धीप्सति पुंगतो मितसंज्ञको
ऽयं ते ज्ञानानेर्ज्ञीपिः पकारांत श्चौरादिको वा दंभिज्ञपिभ्यामिति वेट् जिज्ञपयिषति इड्भावे नानिटि से इति न गुणः से दीर्घ इति दीर्घस्सुपरत्वात् गेरिति णिलोपे न बाध्यते ज्ञी
पिः स्वरस्य स्यादौ से ईत् पूर्वस्य लोपश्च अनिटि मे ज्ञीप्सति इवंतऋधभ्रस्जश्रिस्वयूर्णुभृसनिभ्यः स्य इड्वा इवंतेभ्यः ऋध्यादिभ्यश्च सस्येड् वा स्यात् दिवु क्रीडादौ सिसनासी
स्यपामिनी इट् दिदेविषति इड्भावे नानिटि से इति न गुणः वस्य ऽनिटि से ऊः धातोर्वस्य ऊत्वं स्यात् अनिटि से यत्वं द्वित्वं च दुद्यूषति ऋधवृद्धौ अर्द्धितुमिच्छति स्वरादेः पर
तनेरनिटि से वा दीर्घः तितांसति तितंसति दिदरिद्रिषति दिदरिद्रासति दम्भिज्ञपिभ्यां सस्य वेट् दम्भुं दम्भे दिदंभिषति जिज्ञपयिषति
ज्ञपेस्स्वरस्याऽनिटि से ईन् पूर्वलोपश्च ज्ञीप्सति दम्भेरिच्च धिप्सति धीप्सति इवन्त ऋधभ्रस्जश्रिस्वयूर्णुभृञ् सनिभ्यः सस्येड्वा दिदेविषति व
स्यानिटि से ऊः दुद्यूषति अर्दिधिषति ऋधेरनिटि से स्वरस्य ईर्भवति द्वित्वलोपश्च ईर्त्सति विभ्रज्जिषति विभर्ज्जिषति विभ्रक्षति विभर्क्षति शि
श्रयिषति शिश्रीषति सिस्वरिषति सुस्वूर्षति यियविषति युयूषति ऊर्णुनुविषति ऊर्णुनविषति ऊर्णुनूषति विभरिषति बुभूर्षति॥ इह विधिस्सूत्रशब्दस्य
द्वित्वे अर्दिधिषति इड्भावे ऋधेरनिटि से स्वरस्य ई द्वित्व लोपश्च ऋकारस्य ईः इ स्योर्विंदसे इति दीर्घः स्वसेच पा मस्तानामितितः ईर्त्सति भ्रस्ज पाके इट् पक्षे भ्रस्जो रस्योरि
ति अरः रा च पौ द्वैरिति द्वित्वं विभर्ज्जिषति अर ऽभावे भ्रुत्वं ग्रहेज्यावा इति शस्य जः विभ्रज्जिषति इड्ऽभावे स्कोरिति सलोपः व्रश्चेति षत्वं षढोः कः से इति कत्वं विभ्रक्षति
विभर्क्षति श्रिञ् सेवायां शिश्रयिषति इड्भावे से दीर्घ इति दीर्घः शिश्रीषति स्वृ शब्दोपतापयोः सिस्वरिषति इड्भावे से दीर्घ इति दीर्घे पोरुः इत्युत्वं द्वित्वं सुस्वूर्षति युमि
श्रणे अड् सयोरिति पूर्वोकारस्येत् यियविषति इड्ऽभावे से दीर्घ इति दीर्घे युयूषति ऊर्णुञ् आच्छादने ऊर्णोतेरिड्वा दिप्रत्ययो वा ङित् इति ङित्वात् गुणाऽभावे नु धातोरित्युवङ्
ऊर्णुनुविषति ङित्वाऽभावे ऊर्णुनविषति अतं पूर्वं द्वित्वं पश्चाद् गुणावादेशौ इड्भावे से दीर्घ इति दीर्घः ऊर्णुनूषति भृञ् भर्त्सनभरणयोः विभरिषति इड्भावे योरुरित्युत्वे

सि॰ चं॰
श्रा॰ उ॰
५३

सौतिग्यंनयोरेवषेपूर्वात्सस्यषः पूर्वादिलाप्यरस्यस्तौतिण्यंतयोरेवसस्यषः स्यात्षभूतेसेनान्यस्यषुत्सुतौ षत्वेसेदीर्घइतिदीर्घेचतुष्टूषति वुःसेइतिनेट्साधसंसिद्धो
ण्यंतः द्वितियः सेइतिपूर्वस्येत्वेषत्वेचसिषाधयिषति स्तौतिण्यंतयोः किंषिचक्षरणे सिसिक्षति उपसर्गात् प्रादिश्वनथातोसुनमोइति अट्व्द्वित्वव्यवधानेपीतिचषत्वंपरिषि
षिक्षति षन् संभक्तौ इडभावेजननसनखनामित्यात्वंवासिसनिषति सिषासति क्लिलादितिषत्वं अनिटिसेउपधानस्यलोपः धातोरुपधाभूतस्यनस्यलोपः स्यात् अनिटि
सप्रत्यये तृन्हू हिंसार्थाः तुदादौ ऊदितोवेतिवेट् इडभावेनुलोपः ढत्वेकंत्वेषत्वे चतितृक्षति तितृंहिषति इणः सेगम् नतुबोधने इणोर्गमुःस्यात् सप्रत्ययेप

सौतिण्यन्तयोरेवषेपूर्वात् सस्यषः तुष्टूषति सुष्वयितुमिच्छति सिषाधयिषति सिषेधयिषति सुष्वापयिषति स्तौतिण्यन्तयोरि
तिकिम् सिसनिषति षेइतिकिम् सिषासति तिष्ठासति अनिटिसेउपधायानस्यलोपः तृंहू हिंसायाम् तितृंहिषति तितृक्ष
ति इणःसेगमः बोधने एतुमिच्छति जिगमिषति बोधने तु प्रतीषिषति इणवदिकः अधिजिगमिषति बोधनेतु अधीषिषति इव-
र्णोवर्णोपधाध्दसादेरसानाद्यानाचक्त्वासौसेटौवाकितौ दिद्युतिषते दिद्योतिषते रुरुचिषते रुरोचिषते लिलिखिषति लिलेखिषति
सिस्निहिषति सिस्नेहिषति सिस्निक्षति राधःस्वरस्यहिंसायामिस्सेद्वित्वलोपश्चरित्सति अन्यत्रआरिरात्सति गुरुम् ०॥ ॥

रे बोधनेऽर्थेतुन एतुमिच्छतिगमेःसस्येडिनीट् जि गमिषति बोधनेतुयः सेइति सरूपस्यपूर्वस्येत्वं प्रतीषिषति इणवदिकः इकुस्मरणे गमेःसस्येडितीट् रामः
अधिजिगमिषति इवर्णोपधाद्धसादेरसांनाद्यांनांच क्त्वासौसेटौवाकितौ द्युतदीप्तौ द्युतेः पूर्वस्येतिसंप्रसारणं किन्त्वाद्गुणोनदिद्युतिषतेदिद्योतिषते एवंरु ५२
चदीप्तौ लिखअक्षरविन्यासे ष्णिहप्रीतौ राधोहिंसायामिस्सेद्वित्वलोपश्च राधः स्वरस्येत्यर्थः राधसंसिद्धौ स्कोरितिसलोपे खसेचपाइतिथस्यतः रित्सा-
तिहिंसायांकिं देवमारिरात्सति यः सेइतिपूर्वस्येत् खसेचपाइतिथस्यतः ॥ ॥

वेपूर्वान्सय दे
कृतान
...
व्यत्ययात्स
यावयातु स
तिसौतिव
तयोरेवना
न्यस्य॥

दुत अत्वंनयङीति पूर्वस्यगुणः योयोति ईटूपक्षेयोयवीति १ नुधातोरित्युवूयोयुवति १ योयुयात् २ योयोतु योयवीतु ३ अयोयोत् अयोयवीत् आशिषियेदूत्तिदीर्घः यो
यूयात् ६ लुङिणित्यदुतिणित्वात् धातोर्नामिनइति वृद्धिः अयोयावीत् १० णुस्तुनौनोनोतिनोनवीति १ नोनुयात् नोनवीतु नोनोतु नोनुतात् ३ अनोनवीत् अनोनोत् उसिगु
ण इतिगुणे अनोनवुः लुङि अनोनावीत् १० ओहाक्त्यागे ओहाङ्गतौ अनयोस्तुल्यानिरूपाणि ङित्वप्रयुक्तस्यात्मनेपदस्ययङ्लुक्यप्रवृत्तेः भृञामित्यत्र लुकीति इत्वा
स्यलुग्निमित्तेद्वित्वएवविहितत्वाच्च आतइतिपूर्वस्यात्वं ईटूपक्षे जाहेति जाहाति द्वेसाविती त्वं जाहीतः इहडिति हसेभीहाकौ रिद्देतीत्वं नाऽनुबंधनिर्दिष्टत्वात् देरि
आशिषिवध्यात् अवधिष्ट चञ्चुरीतिचञ्चूर्तः चञ्चूरति चञ्चूर्यात् चञ्चुरीतु चञ्चूर्त चञ्चूर्तात् चञ्चूर्ताम् चञ्चूर्हि अचञ्चुरीत् अचञ्चूः चो
स्कुन्दीतिचोस्कुन्ति चोस्कुन्तः चोस्कुन्दति चोस्कुन्यात् चोस्कुन्दीतु चोस्कुन्तु चोस्कुन्ताम् अचोस्कुन्दीत् अचोस्कुन् अचोस्कुन्ताम् अ
चोस्कुन्दुः सिपि अचोस्कुन्दीः अचोस्कुन् चंखनीति चंखन्ति चंखातः चंखनति चंखनीषि चंखंसि चंखाथः चंखनीमि चंखन्मि चंखन्मि चं
खन्वः चंखायात् चंखन्यात् चंखनीतु चंखन्तु चंखातात् चंखाताम् चंखन्तु चंखाहि अचंखनीत् अचंखानीत् अचंखानिषाम् योयवीति
योयोति योयुतः योयुयात् योयवीतु योयोतु अयोयवीत् नोनवीति नोनोति नोनुतः ति नोनुयात् नोनवीतु नोनोतु अनोनवीत् अनोनोत् सिपि अनोनवीः अ
नोनोः जाहेति जहाति द्वे सौ जाहीतः जाहीयात् जाहेतु जाहातु जाहीतात् जाहीताम् अजाहेत् अजाहात् अजाहीताम् अजाहुः जाहीयां
त्यंतोऽत्र द्वेसावित्यालोपः जाहति जाहेषि जाहासि जाहीथः जाहीय जाहेमि जाहामि जाहीवः जाहीमः १ द्वेसाविती त्वं जाहि नाऽऽतोऽनपि अजाहासीत् अजा
जाहीयात् इहहाकोयादावालोपइत्यालोपेन अनुबंध निर्दिष्टत्वान् २ जाहेतु जाहातु जाहीतात् द्वौ द्वेसाविती त्वं जाहीहि इहहइर्वाहाविति ह्रस्वदीर्घविकल्पे रूपत्रयं
जहानि इति प्ति पानिर्दिष्टत्वात् ३ अजाहेत् ईडऽभावे अजाहात् ४ आशिषि जाहायात् इहदादेरित्येत्वं दादेरिति इत्वं च न हाभित्युभयत्राऽनुबंधनिर्दिष्टत्वात् ६ जाहिता

सि॰ चं॰
आ॰ उ॰
४९

डुदाञ् दाने आत इति पूर्वस्यात्वं ददाति ईदूपधे दादेति दादेरित्या लोपः दात्तः देरित्यंतो ऽत् ददति १ दाद्यात् २ दादेतु ददातु दत्तात् हौ दाहाविन्येन पूर्वलोपौ देहि देत्तात् ३ अददात् अदादेत् ४ ददौ चकार ५ दादेरे इत्येत्वं दादेयात् ६ ददिता ७ ददिष्यति ८ अददिष्यत् ९ दादेपे इति सिलोपः अदादात् १० धेट् पाने दधाति दाधेति दादेरित्या लोपः स्वसेत्तु पाक सानामिति नः दात्तः जयोर्धइति धवं न दादेरित्या लोपस्यस्थानिवत्वेन नश्चांतत्वाभावात् तत्र सूत्रे व्यवस्थितार्थ चानुवृत्तेर्वा दाधति १ दाध्यात् २ दाधातु दाधेतु [illegible] दात्तात् हौ दाहाविन्येन पूर्वलोपौ धेहि ३ अदाधात् अदाधेत् दाधांचकार ५ दादेरे इत्येत्वं दाधेयात् ६ दधिता ७ दधिष्यति ८ अदधिष्यत् ९ शाच्छासा आ धेटामिति वा सिलोपः अदाधात् पक्षे यमिरमिनम्यातामिति इट् सकौ अदाधासीत् धेटो भूतमात्रे दिवादि परीक्षेवेति ङः अदाधत् १० डु

दादेति ददाति दादेः दात्तः ददति ददासि दात्यः दात्य ददद्दः दाद्म दांहो देहि दादेयात् आतो ऽनपि ददिता दादेः पे अदादेत् अदा
दात् अदादात्तां स्वं धेट् दाधेति दाधाति दात्तः दाधति दाध्यात् धेहि दाधेयात् अदाधासीत् अदाधेत् अदाधात् अदाधत्
अदाधताम् अदाधन् डुधाञ् दाधेति दाधाति धात्तः धात्यः दादेः दाध्वः दाध्मः लङि अदाधात् अदाधेत् पितो ऽस्तु दैप् शोधने दा
पूलवने दादेति दादाति दासीतः दादति दासीयात् दादेतु ददातु दादीतात् दादीहि अदादेत् अदादात् अदादीताम् दादायात् अदादा
धात् धारयादीदाधाति दाधेति पूर्वस्य ङि निफ सेधः इति धः स्वसेच पाइति नः धात्तः दाधति १ दाध्यात् दाधातु दाधेतु धात्तात् हौ दांहाविन्ये ((सीतु ॥
त्व पूर्वलोपौ धेहि अदाधात् अदाधेत् ४ दाधांचकार ५ दादेरे इत्येत्वं दाधेयात् ६ दधिता ७ दधिष्यति ८ अदधिष्यत् ९ दादेः पे इति सिलोपः अदाधात् ॥
१० दापलवने दैप् शोधने आ दादिक भौवादिकयो रनयोर्दादित्वं न ददाति दादेति दैस्लाविनी त्वं दादीतः देरित्यंतो ऽत् देस्लावित्या लोपः ददति १ दादीयात् २ दा
दात् दादेतु दादीतात् दैदादीहि ३ अदादात् अदादेत् ४ ददौ चकार ५ दादायात् ददिता ७ ददिष्यति ८ अददिष्यत् ९ यमिरमिनम्यातामिति इट् सकौ अदादासी

राम
४९

ईत्वं च यप्रत्यये परे समासप्रत्यययोरिति विभक्तेर्लुक् सधातुरिति धातुत्वात्तिवादिः ॥ ॥ पुत्रीयति पुत्रीयेत् पुत्रीयतु अपुत्रीयत् कासादिप्रत्ययादित्याम् यत इत्यलोपः
पुत्रीयांचकार यत इत्यल्लोपः पुत्रीय्यात् पुत्रीयिता पुत्रीयिष्यति अपुत्रीयिष्यत् अपुत्रीयीत् गव्यतीत्यत्र खोर्लोपः अपदान्ते इति नभवत्यपदान्तत्वादनपि संनि
पातपरिभाषया यप्रत्ययस्य यकारस्य नपि च हसादिति लोपो न यकारे परे वान्तादेशविधानाद् वकारीयस्य लोपस्य निमित्तं न भवतीति भावः गव्यांचकार गवि
नाव्यामिच्छति त्वन्मदेकत्वे इति त्वन्मदादेशौ त्वद्यति यत इत्यल्लोपः अनपि च हसादिति यलोपः त्वदांचकार मामिच्छति मद्यति युवां युष्मान् वेच्छति युवावा
विति सूत्रे विभक्ताविति युक्तं ततो विभक्तिपरत्वाभावान्न युवावौ एकार्थत्वाभावान् त्वन्मदावपि न युष्मद्यति एवमस्मद्यति काम्यश्च नाम्न इच्छायामर्थे काम्यप्रत्ययः
"
पुत्रीयति क्वचिन्स्वरवद्धकारः गामिच्छति गव्यति गव्यांचकार नाव्यति नाव्यांचकार त्वामिच्छति त्वद्यति हसाद्यस्य लोपो वा
नपि नाम धातौ त्वदांचकार त्वद्यांचकार मामिच्छति मद्यति युष्मद्यति अस्मद्यति काम्यश्च पुत्रकाम्यांचकार धनस्यनेकारो गार्ध्ये धनाय
ति अन्यत्र धनीयति उदकस्योदन् पिपासायाम् उदन्यति अन्यत्रोदकीयति गीर्यति गिरांचकार गीर्यांचकार पूर्यति दिवमिच्छति दि
व्यति अप्सुमिच्छति अदस्यति अतो रिः कर्त्रीयति ॥ स्यात् आत्मनः पुत्रमिच्छति पुत्रकाम्यति यत इत्यल्लोपः पुत्रकाम्यांचकार पुत्रकाम्यिता इहा
नपि च हसादिति यलो ॥ न अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति परिभाषया धनस्यनेकारो गार्ध्ये ग ॥ र्ध्यः अभिलाषुकस्तस्य भावे गार्ध्यं यण् सत्यपि धने पुनर्धनमि
च्छति धनाय ति ये इति दीर्घः यश्च दरिद्रः सन् धनमिच्छति तत्र धनीयति उदकस्योदन् पिपासायां यश्च सत्येव पानमुदकमिच्छति तत्र तु उदन्यति यश्च कालांत
रोपयोगार्थं पातुमुदकमिच्छति तत्र उदकीयति गिरमिच्छति गीर्यति य्वोर्विहसे इति दीर्घः पुरमिच्छति पूर्यति य्वोर्विहसे इति सूत्रे धातोरिकारोकारयोरित्युक्तत्वा
न्नेह दिवमिच्छति दिव्यति दिवु धातोः क्विपि क्विति क्रमे कावितिर्दस्योत्वे इति भवति यप्रत्यये यूपतीति कर्त्तारमिच्छति ऋतोरीरितिरिः ये इति दीर्घः कर्त्रीयति

सि॰ चं॰ हसात्तद्धितयस्यलोपो यच्चीच हसादुत्तरस्य प्रत्ययकारस्य लोपो भवति यप्रत्यये च्विप्रत्यये च परे गार्ग्यायनणिति यः च्वौ गार्गीभवति गार्ग्यमिच्छति गार्गीयति

श्रा॰ ७ वाचमिच्छति अप्रत्ययो रादित्य जवाः करणे न कच्चित्प्रत्यये पदकार्य्यं नेति ज्ञापितं तेन पदत्वाऽभावात् चोः कुरिति कुत्वं न वाच्यति आत्मनः कविमिच्छति येइति

६२ दीर्घः कवीयति समिधमिच्छति समिध्यति हसाद्यस्यलोपो वाः नपि हसांतान्नाम्नो यस्य लोपो वा अनपि परे आदेः परस्येति पूर्वलोपः यनइ ल्यलोपः ल्यलोपः न

स्य स्थानिवत्वादुपध अलघोरिति गुणो न समिधिता समिधिता मांतात्व्ययाभ्यां योन मांतप्रकृतिकान्नाम्नोऽव्ययाच्च यो न किमिच्छति स्वरिच्छति अश्ववृषयोर्यसु

क् मैथुनेच्छायां अश्वस्यति मैथुनार्थमश्वमिच्छतीत्यर्थः वृषमिच्छति मैथुनार्थं वृषस्यति क्षीरलवणयोर्लालसायां उत्कटेच्छायां सुक् ये लालसायां क्षीरमिच्छति क्षीर

हसात्तद्धितयस्यलोपो यच्चीच गार्गीयति वाच्यति कवीयति समिध्यति समिधा स्वकार समिधिता मांतात्व्ययाभ्यां यो न किमिच्छति इ

दमिच्छति स्वरिच्छति उच्चैरिच्छति अश्ववृषयोर्यसुक् मैथुनेच्छायाम् अश्वस्यति वडवा वृषस्यति गौः क्षीरलवणयोर्लालसायां सु

क् क्षीरस्यति बालः लवणस्यत्युष्ट्रः नाम्नोये लालसायां सुगसुकौ दधिस्यति दध्यस्यति मधुस्यति मध्वस्यति यशस्काम्यति मांतात्व्यया

भ्याङ्क्काम्यः किंकाम्यति स्वःकाम्यति उच्चैस्काम्यति करणे च नाम्नः करणेर्थे यः तपस्यति तपश्चरतीत्यर्थः नमसः पूजायाम् नमस्यति देवा

नू पूजयतीत्यर्थः वरिवसः परिचर्यायां वरिवस्यति गुरुं शुश्रूषयतीत्यर्थः शब्दादिभ्यो यङ् शब्दायते वैरायते कलहायते अभ्रायते मेघा।

स्यति लवणस्यति नाम्नो ये लालसायां सुगसुकौ नाम्नः सुगसुकावागमौ भवतः यप्रत्यये परे तल्लालसातिरेको लालसा तस्यामर्थे दधिस्यती ((यने कष्टायते ॥

त्यत्र षः सदृति विपरीतनिर्देशान्न षत्वं मांतात्व्ययाभ्यां काम्यः मांतप्रकृतिकान्नाम्नोऽव्ययाच्च काम्यः स्यात् इच्छायां किमिच्छति किंकाम्यति स्वः स्वर्गइच्छति स्वः राम

काम्यति करणे च यदृत्यनुहृतं करोत्यर्थे इत्यर्थः नमस्करोति नमस्यति देवानू पूजयतीत्यर्थः वरिव स्यति गुरून् सुश्रूषते इत्यर्थः शब्दादिभ्यो यङ् एभ्यः क ६२

र्मभ्यः करोत्यर्थे यङ् शब्दं करोति शब्दायते पक्षे णिजिङित्करणे इति णिप्रत्ययोपि भवति शब्दयतीति न्यासकारः चतुर्थ्यंतात्कष्टशब्दादुत्साहेऽर्थे यङ् कष्टाय क्रमने इति क

मुचोऽकर्म्मकस्य गुणो वा सेऽद्वित्वं च मुच्लृ मोक्षणे चोः कुरिति कः मोक्षते मुमुक्षते अकर्म्मकस्य किं मुमुक्षति नानिटि सेड् इति गुणाभावः वृतु वर्त्तने वृतादिभ्यः स्यसयोरि
ति वा पक्षे निट्त्वं च नाऽनिटि सेड् इति न गुणः विवृत्सति विवर्तिषते नृती गात्रविक्षेपे नृत नृदेति वेट् नानिटि सेड् इति न गुणः निनृत्सति निनर्त्तिषति वृङ् वृञ् ॠदन्तात्सस्येड्वा तृ
प्लवनसंतरणयोः वृङ् वृञ् इति वेटो दीर्घः तितरिषति तितरीषति इड्भावे ॠत इद्धातोः इति रीर्विहसेड् इति दीर्घः तितीर्षति वृञ् वरणे वृङ् वृञ् इति वेटो दीर्घः विवरिषति वि
वरीषति इडभावे पोरुरित्युर् वुवूर्षति एवं वृङ् संभक्तौ विवरिषते विवरीषते वुवूर्षते धृङ् कौटिल्ये दुधूर्षति स्मिङ् पूङ् रंज्वशिभ्यः सस्येट् स्मिङ् ईषद्धसने अस्यानिट्
त्वादिडागमस्याप्राप्तिः स्तौति ण्यन्तयोरेवेति नियमान्न षः सिस्मयिषते पूङ् पवने उः सेड् इति निषेधे आप्ते अङ् सयोरिति पूर्वो वर्णस्येत् पिपविषते ॠगतौ अस्याप्यनि

मुचोऽकर्मकस्य गुणो वा सेद्वित्वलोपश्च मोक्षते मुमुक्षते वा वत्सः स्वयमेव अकर्मकेति किम् मुमुक्षति वत्सं कृष्णः विवर्तिषते विवृत्सति नि
नर्तिषति निनृत्सति वृङ् वृञ् ॠदन्तात्सस्येड्वा इति तरिषति तितरीषति तितीर्षति विवरिषते विवरीषते वुवूर्षते विवरिषति विवरीषति।
वुवूर्षति धृङ् कौटिल्ये दुधूर्षति स्मिङ् पूङ् रञ्ज्वशिभ्यः सस्येट् सिस्मयिषते पिपविषते अरिरिषति अञ्जिजिषति अशिशिषते उचि च्छिषा।
ति अधिजिगापयिषति अध्यापिपयिषति शिश्वा यथिषति शुशावयिषति जुहावयिषति पुस्फारयिषति पुस्फोरयिषति॥ पिपावयिषति
विभावयिषति यियावयिषति रिरावयिषति लिलावयिषति सिस्नावयिषति सुस्नावयिषति॥ ❁ ॥ इत्वादिडागमस्याऽप्राप्तिः सस्येड्
द्विगुणे ऋ गतौ अर्तिसेड् इति स्थिते स्वरादेः परइति रिसशब्दस्य द्वित्वे अरिरिषति अंजू व्यक्तिम्रक्षणगतिषु अशूङ् व्याप्तौ अनयोरूदित्वादिड्विकल्पे प्राप्ते नि
त्यमिट् अश भोजने इति क्र्यादिस्तु नित्यं सेडेव अंजिजिषति अशिशिषते उञ्छ उंछे अत्र छ इति छस्य द्वित्वे खसे चपा झसानामिति चकारे चकते च छसहि
तस्येटो द्वित्वे हसादि शेषे च उचिच्छिषति इङ् अध्ययने अध्यापयितुमिच्छति अङ् सपरे ओ इङ् ङो गाङ् वेति वा गाङ् णौ पुगिति पुक् अधिजिगापयि
षति पक्षे इङ् क्रीजीनामित्यात्वं स्वरादेः परइति पिशब्दस्य द्वित्वे अध्यापिपयिषति टुओश्वि गतिवृद्ध्योः श्वयतेर्ण्यन्तस्येति वा संप्रसारणं शिश्वाययिषति

सुश्रावयिषति ह्वेञ् स्पर्द्धायाम् ह्वयतेर्यङ्सपरे इति संप्रसारणे पुगभावे च कृते जुहावयिषति स्फुरं विकसने णौ चिस्फुरोर् इत्यात्वे कृते ञिनिमित्तः स्वरादेश इति वचनेनत
स्यस्थानिवद्भावादकारविशिष्टस्य द्वित्वस्य द्वित्वं पुस्फारयिषति आत्वाभावे पुस्फोरयिषति टुक्षु शब्दे चुक्षावयिषति पूङ् पवने अङ्सयोरिति पूर्ववर्णस्येत्वं पिपावयिष
ति भूसत्तायाम् भावयितुमिच्छति पूर्वस्येत्वं बिभावयिषति युमिश्रणे अत्रापीत्वं यियावयिषति रुशब्दे पूर्वस्येत्वं रिरावयिषति लूञ्छेदने लिलावयिषति स्नुगतौ स्न
वति शृणोति द्रवतीति ति त्वं वा सिस्रावयिषति सुस्रावयिषति ॥ ॥ सांतात्स्रोन शैषिकान्मत्वर्थीयात् शैषिको मत्वर्थिकः सरूपप्रत्ययो नेष्टः सन्नंतान्न सनिष्यते र
शैषिकाच्छैषिकः सरूपः प्रत्ययो नेष्टः शालीयेभवद्वितिवाक्यमेवनतु ईयांतात्पुनरीयः सरूपं किं आहिच्छत्रे भवः आहिच्छत्रीयः अर्थ्यनादीयः तथा मत्वर्थीयान्मत्वा
र्थिकः सरूपप्रत्ययाद्य अथवान् नभवति धनवानः स्यात् क्षिवत्वं नातत्त्वतुः विरूपस्तुस्यादेव दंडिमती शालासरूपद्वत्यनुसंबध्यते सरूपः सादृश्यं तत्तु अर्थ द्वारा तेने

सान्तात्स्रोन चिकीर्षितुमिच्छति स्वार्थसान्तात्तुस्यादेव जुगुप्सिषते॥ इतिसान्तप्रक्रिया अतिशये हसादेर्यङ्द्विश्च हसादेरेकस्वरा
द्धातोर्भृशार्थे पौनःपुन्ये च यङ् प्रत्ययो भवति द्वित्वञ्च यङि यङि यङ्लुकि च पूर्वस्य नामिनो गुणः सधातुः ङित्वादात्मने भृशं पुनःपुनर्वा भव
त्यसंचेनादिद्वित्वाससनू नभवति स्वार्थसांतात्तुस्यादेव जुगुप्स इति स्वार्थसप्रत्ययः तदंता द्वित्वासः इति बोभूयते बोभूयाञ्चक्रे बोभूयिषीष्ट अबोभूयिष्ट बोभु
जुगुप्सते यः से इतीत्वे मानादीनामिति दीर्घे च मीमांसिषते गुपू गोपने मान विचारणे इतिसप्रक्रिया अतिशये हसादेर्यङ् द्विश्च हस आदिर्यस्य स हसादिस्तस्मादेक
स्वराद्धातोर्यङ् स्यात् यङंतस्य धातोर्द्वित्वं च अतिशयेऽर्थे अतिपूर्वात् शीङो भावे स्वरादङ् इत्यः अतिशयो द्विविधः पौनःपुन्य भृशार्थश्च अतिशये किं पठति एकस्वरात्कि
म् पुनः पुनर्जागर्ति हसादेः किम् भृशमीक्षते भृशं शोभते भृशं रोचते इत्यादौ यङ् नेति भाष्यं पौनःपुन्ये तु स्यादेव रोरुच्यते शोशुभ्यते यङि यङ्प्रत्यये लुकि च पूर्वस्य भ
स्य तु दत्वं भूसत्तायाम् सधातुरितिधातुत्वाद्धातवः ङित्वादात्मनेपदम् पुनः पुनरतिशयेन वा भवति बोभूयते बोभूयेत बोभूयतां अबोभूयत कासादिप्रत्य
यादित्याम् यत इत्यल्लोपः बोभूयाञ्चक्रे बोभूयिषीष्ट बोभूयिता बोभूयिष्यते अबोभूयिष्यत अबोभूयिष्ट भुज पालनादौ अतिशयेन भुनक्ति बोभुज्यते॥ ॥

नित्यत्वपि

अनपिचहसात दूसाद्दुतस्यचग्रास्यलेयेभव हसात्किंलोलूयपिनापोपूयिनाश्रा देःपरस्यपरस्यपुयद्विहितंतनत्रस्यादेर्वोध्यमितियलोपःयतङ्यलोपःवोभुजांचक्रे
वोभुजिषीष्टअलोपस्यस्थानिवत्वान्नोपधागुणःएवंमुहवेविलिहश्रासादनेहुदानादनयोःयेङितिदीर्घः जोहूयतेविदज्ञानादौवेविद्यतेङुपचषपाकेआतःआअत
इतिच्छेदःपूर्वस्येत्यनुवृत्तेनपापच्यतेपठ्यक्तायांवाचिपापठ्यतेसिचोपङिनमस्यषःसिचेःसस्यषत्वंनस्यात्यङ्प्रत्ययेपरेषिचक्षरणेसेसिच्यतेसूचिसूत्रिमूत्र्यःऽत्यर्थश्रूर्णोति
भ्योपङ्सस्वयेशूच्यसूत्रवेष्टनेमूत्रप्रस्रवणेएतेत्रयश्चुरादावदंताःसोसूच्यतेसोसूत्र्यतेमोमूत्र्यतेअटतेगोःकुटिलमटतिइहहत्यशब्दस्यद्वित्वंआतद्वत्यात्वमअटाट्यतेअ

अनपिचहसात [illegible] वोभुजांचक्रेवोभुजितुंमोमुह्यतेमोमुहांचक्रेलेलिह्यतेजोहूयतेवेविद्यते
दहभस्मीकरणेदंशदशनिभंजूआमर्दनेपसथानुर्दन्यां तःसोत्रोगत्यर्थः॥
आतःपङ्यङ्लुकिचपूर्वस्यातआकारःपापच्यते पापठ्यतेसिचोयङिनषःसेसिच्यतेसूचिसूत्रिमूत्र्यठ्यर्त्यर्थशूर्णोतिभ्योयङ्सोसूच्य
तेसोसूत्र्यतेमोमूत्र्यते यकारपररेफस्यनद्वित्वनिषेधः अरार्य्यते अरारांचक्रेअशाश्यते ऊर्णोनूयते गत्यर्थात्कौटिल्येएवयङ्कुटिल
मटतिअटाट्यतेकुटिलंव्रजतिवाव्रज्यतेलुपसदचरजपजभदहदंशगृभ्योधात्वर्थगर्हायामेवयङ्गर्हितंलुम्पतिलोलुप्यतेसास
द्यतेजमजपानुक्तजमानास्यजयजभदहदंशभञ्जपसचरफल्लांचपूर्वस्यनुग्यङ्लुकोः॥ गतौकुटिलमूच्छतिःगुणोर्त्तिसंयोगाद्योरि

तिगुणःयकारपररेफस्यनद्वित्वनिषेधःयकारःपरोयस्मात्सःयकारपरः यकारंपरश्चासौरेफश्चयकारपररेफस्तस्यततोर्यशब्दस्यद्वित्वेहसादिशेषेआतदूति
दीर्घेचअरार्यतेइतिभाष्योदाहरणान्नूलिटिअनपिचहसादितियलोपःयतङ्यलोपःअरारांचक्रेलुटिअरारिताअशूङ्व्याप्तौअशाश्यतेऊर्णुञ्आच्छादनेयेङिति
दीर्घःऊर्णोनूयतेगत्यर्थात्कौटिल्यएवयङ्कुटिलस्यभावःकौटिल्यंव्रजगतौकुटिलंव्रजतिआतद्रूतिपूर्वस्यात्वंवाव्रज्यतेलुपसदचरजपजभदहदशगृभ्योधात्वर्थ
गर्हायामेवयङ्लुपॢच्छेदनेगर्हितंलुंपतिलोलुप्यतेषद्लृविशरणादौआतदूतिपूर्वस्यात्वंगर्हितंसीदतिसासद्यतेजमजपांनुक्जपचक्रायांवाचिजभीगात्रविनामे

पदांतेवर्तमानस्यानुस्वारस्य यमावा भवति यपे परे अस्य यपस्य सवर्णाः

सि·चं· तालव्यातदृतिमाधवः चरगत्यादौत्रिफलाविशरणेफलनिष्पत्तौवाएषांसमप्रत्याहारांतस्यचनुकुयङ्लुकोः॥ ॥ चरफलोः पूर्वात्तुपरस्यातउत्त्यङ्लुकोःपूर्वो
आ·उ· तद्द्विरूपादुत्तररूपस्यातउत्वमित्यर्थः नुगित्यनेनानुस्वारोलक्ष्यतेसचपदांतवत् जमजपामितिनुमागमोऽनुस्वारंबोधयतिसोऽनुस्वारः पदांतकार्यंलभतेइत्यर्थः तो
५५ नवापदांतस्येत्यनेनवापरसवर्णः चंचूर्य्यतेगिरतेरेफस्यलत्वंयङिगृहनिगरणेदृत्यस्यरेफस्यलत्वंस्याद्यङिगर्हितंगिलतिजेगिल्यतेयमउपरमेकणनिमीलनेततु
विस्तारेयमांतत्वादिकं पूर्वस्यनुकुयंयम्यतेचंकण्यतेतंतन्यतेरीगृदुपधस्यऋदुपधस्यधातोःपूर्वस्यरीकुयङि· ऋदुपधस्येतिचेकीत्यंतेनेरभावपक्षेएकस्वरत्वा

षु दृष्टेषु कर्तृव्यापारोनुमीयते तदुक्तं च कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया आश्रासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया १ यद्यप्याधार
लेनोक्ते कर्म्मकर्तरि यगात्मनेपदचिण्वदिटः पच्यते ओदनः अपाचि भिद्यते काष्ठम् अभेदि द्विकर्म्मकाणान्न अजा ग्राममन्नयति दुहिपच्योस्स
कर्मकयोर्वा दुहस्तु नमांकर्म्मकर्तरि यगिणौ न गौः पयो दुग्धे दोग्धि वा ॥ भावयोरित्यत्र भावशब्देन क्रियापि गृह्यते तेन तथाप्यनयोर्भेदो विवक्षितः पृथ
गुपादानात् परिस्पंदरूपो धात्वर्थः छिदादिः क्रिया अपरिस्पंदरूपो विक्लित्त्यादिर्भावः पचत्योदनं भिनत्ति काष्ठं च देवदत्तः पच्यते ओदनः भिद्यते काष्ठं स्वयमेवेत्य
त्राख्यातेन कर्मकर्तुरुक्तत्वात् प्रथमा कर्तृस्थक्रियायास्तूदाहरणमाह आश्रास्ते घटं देवदत्तः आश्रास्ते घटः स्वयमेव गच्छति ग्रामं देवदत्तः गच्छति ग्रामः स्वय
मेवेत्यत्र घटग्रामयोर्दृष्टयोर्न हि देवदत्तस्य व्यापारोऽनुमातुं शक्यते इति कर्तृस्थत्वं क्रियायाः द्विकर्मकाणां न द्विकर्मकधातूनां कर्मकर्त्ता कर्मवन्न भवति अजा ग्रामं
नयतीत्यत्र प्रधानं कर्मणः कर्तृसंज्ञा प्रधाने नीहृकृष्वहामित्युक्तत्वात् आख्यातेनोक्तत्वात्तत्र प्रथमा दुहप्रतिषेधाभावे यक् स्यात् क्रियाफलस्याकर्तृगामित्वे
त्यात्मनेपदं स्यादित्यर्थः दुहिपच्योः सकर्मकयोर्वा अनयोः कर्मकर्त्ता कर्मवद्वा भवति दुहस्तु नमां कर्मकर्त्तरि यगिणौ न एभ्यो यगिणौ प्रत्ययौ न भवतः कर्मकर्त्तै

व्यापारो वर्त्तते ५

सि॰च॰ अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकारः कालादिकर्मकाद्धातोर्भावकर्मणोरर्थयोराख्यातो भवति कारके अकर्मकधातुभिर्योगे इति सूत्रेण कर्मसंज्ञा विधा

श्रा॰उ॰ यां धातूनां कालादिकर्मकाः कालादिकर्मकस्य कर्मण्याख्यातम् उदाहरणमाह मास आस्यते इत्यत्र कालवाचिकर्मण आख्यातेनोक्तत्वात् प्रथमा कर्त्तुरनुक्तत्वात् तृतीया तोऽध्या

७५ ह्यायः भावे तु मासमासितं देवदत्तेनेत्यत्र कर्मणोऽनुक्तत्वान्मासमिति द्वितीया कर्तुरनुक्तत्वाद्देवदत्तेनेति तृतीयान्यं तात् कालादिकर्मकाद्धातोस्तु प्रयोज्यकर्मण्येवाख्या

तादिः मासमास्यते माणवक इत्यत्र कालवाचिकर्मणोऽनुक्तत्वान्मासमिति द्वितीया माणवक इति प्रयोज्यं कर्म तत्राख्यातेनोक्तत्वात् प्रथमा कर्त्तरि त्वनुक्तत्वात् तृतीया

देवदत्तेनेति इति भावकर्मप्रक्रियासकललकारकारणमवान्तरव्यापारहीनस्याकारकत्वात् तत्र स्वव्यापारे स्वातन्त्र्यं च व्यापारभेदाऽऽकांक्षायां करणादिसंभवः तत्र यदा

अकर्मकाणां कालादिकर्मकाणां भावे कर्मणि च लकारः मासं मासो वास्यते देवदत्तेन क्रोशः क्रोशं वास्यते कुरवः कुरून् वास्यते गोदोहम्

गोदोहो वास्यते अन्त्यानां तु प्रयोज्ये प्रत्ययः मासमास्यते माणवकः यदासौ कर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्त

राण्यपि कर्तृसंज्ञां लभन्ते साध्वसिश्छिनत्ति काष्ठानि पचन्ति स्थाली पचति पच्यते ओदनेन अपाविभियते काष्ठेन अभेदि॥ कारकान्तराणां सौ

कर्यातिशयं द्योतयितुं प्रतिपादयितुं कर्तृव्यापारो वक्तुं नेष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां प्राप्नुवन्ति स्वव्यापारे स्वतन्त्रत्वात् सुखकरोतीति सुकरस्य भावः सौकर्यं

य णकारकान्तराणां पूर्वं करणादित्वेपि संप्रतं कर्तृसंज्ञा करणात् कर्तर्याख्यातो भवति साध्वसिश्छिनत्तीत्यत्र करणस्य कर्तृसंज्ञा आख्यातेन कर्तुरुक्तत्वादसिरि

त्यत्र प्रथमा काष्ठानि पचन्तीत्यत्रापि करणस्य कर्तृसंज्ञा कर्तुराख्यातेनोक्तत्वात् काष्ठानीति प्रथमा स्थाली पचति इत्यत्राधारस्य कर्तृसंज्ञा कर्तुराख्यातेनोक्तत्वात् स्था रामः

लीति प्रथमा कर्मणस्तु कर्तृत्वविवक्षायां प्राक् सकर्मका अपि प्रायेणाऽकर्मकाः कर्मणः सौकर्यातिशयं द्योतयितुं यदा कर्त्तृविवक्षा ततः प्राक् सकर्मका अपि धातवोऽक ७५

र्मकाः प्रायेण भवन्ति प्रायेणेत्युक्तत्वादेककर्मकाः छिदिभिदिप्रभृतयः एवाकर्मका भवन्ति न तु द्विकर्मका अकर्मकस्य फलमाह तेभ्यो भावे कर्त्तरि च लकारः कर्मकर्त्तुरक

लभेरिसमोर्नुम् वाडुलभ षू प्राप्तावित्यस्य नुमागमो वा स्यात् इणिप्रत्ययेणमिप्रत्यये च परे प्रादेर्नित्यं नुम् पूर्वस्य लभेर्नित्यं नुम् स्यात् णमिप्रत्यये प्रलंभं २ अथ येद्विकर्मक
धातवस्तेभ्य आतूकृत्य क्तखलार्थप्रत्ययाः किं मुख्ये कर्मणि उत गौणे किं वोभयोरिति संदेहे व्यवस्थामाह गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहां बुद्धिभक्षार्थयोः शब्द
कर्मकाणां निजेच्छया १ प्रयोज्यकर्मण्यन्येषां ण्यंतानां लादयो मताः दुह्याचितिकारके उक्तं दुह्यादेर्द्वादशसंख्यस्य धातोर्गौणे कर्मणि लादयः प्रत्यया मताः नीप्रभृती
नां चतुर्णां प्रधाने कर्म्मणि लादयो मताः बुद्धिभक्षार्थयोर्ण्यंतयोः शब्दकर्मकण्यंतानां च प्रयोज्यप्रधानयोरन्यतरकर्मणि निजेच्छया लादयो मताः अन्येषां ण्यन्तानाम्
प्रयोज्यकर्म्मणि लादयो मताः कारके गतिबुद्धीत्यनेन कर्तुर्यत्कर्मकारकं कृतं तत्प्रयोज्यं कर्म ज्ञातव्यं लादयइत्यत्रादिशब्देन कृत्यक्तखलार्थाः प्रत्यय्रा ग्राह्याः दुह्या

लभेरिण्णमोर्नुम्वा अलम्भि अलाभि गौणे कर्म्मणि दुह्यादेः १ प्रधाने नीहृकृष्वहाम् बुद्धिभक्षार्थयोश्शब्दकर्म्मकाणान्निजेच्छया २ प्रयो
ज्यैकर्म्मण्यन्येषां ण्यन्तानां लादयो मताः गौर्दुह्यते पयः धुक्षीष्ट अजा ग्राममनीयते ह्रियते कृष्यते उह्यते बोध्यते माणवकन्धर्म्मः माणवः ८
को धर्म्ममिति वा भोज्यते माणवक ओदनः ओदनम्माणवको वा पाठ्यते माणवकम्वेदः माणवको वेदमिति वा देवत्तो ग्राममङ्गम्यते ॥

देर्गौणे कर्मण्यात् उदाहरणमाह गौर्दुह्यते पयइत्यत्र गौरिति गौणं कर्म तत्राख्यातेनोक्तत्वादन्योक्ते इत्यनेन प्रथमा पयइति तु मुख्यं कर्म तत्र कर्मणि द्वितीया कर्त्रे
रित्वनुक्तत्वात्तृतीयादेवदत्तेनेति नीत्यादीनां प्रधानकर्मण्यात् उदाहरणमाह अजाग्राममनीयते इत्यत्राजेति मुख्यं कर्म तत्रोक्तत्वात्प्रथमा ग्राममिति गौणं कर्म कर्त्तातु
तृतीयातोऽध्याहार्यः बुद्धिभक्षार्थयोः शब्दकर्मकाणां च ण्यंतानां प्रयोज्ये मुख्ये च कर्मण्यात् उदाहरणमाह बोध्यते माणवकं धर्म इत्यत्र धर्म इति मुख्यं कर्म माणव
कमिति प्रयोज्यं कर्म तत्र निजेच्छयाऽऽख्यातादिः कर्तव्यः भोज्यते माणवकमोदन इत्यत्रौदन इति मुख्यं कर्म माणवकमिति प्रयोज्यं कर्म तत्र निजेच्छयाऽऽख्यातादिः प
ठ्यते माणवकं वेद इत्यत्र वेद इति मुख्यं कर्म माणवकमिति प्रयोज्यं कर्म तत्र निजेच्छयाऽऽख्यातादिः तृतीयांतः कर्त्ताध्याहार्यः ण्यंतस्य प्रयोजकर्मण्यात् उदाहरणमाह दे
वदत्तो ग्रामं गम्यते इत्यत्र ग्राममिति मुख्यं कर्म देवदत्त इति प्रयोज्यं कर्म तत्राख्यातादिः कर्मणि उक्तत्वात् प्रथमा कर्त्ता तु तृतीयांतोऽध्याहार्यः ६ ॥

सि॰ चं॰ इण्वदिटोनदीर्घः इटोग्रहामिति सूत्रेण सिसतेत्यादिलक्षणेन विधीयमानस्यैवेटो दीर्घो भवति नेण्वदिट इत्यर्थः दृशेः कर्मण्यात् लुङि॰ इण्वदिटि परे उपधाया
आ॰ उ॰ लघोरिति गुणः अदर्शिषातां पक्षे दृशषेति षत्वं षढोरिति कः हशषांतादिति सकृ तु न न तु दृशेरित्युक्तत्वात् सिस्योरिति न गुणः अदृक्षातां शमेर्भावे आद कर्म
७३ कत्वात् मांतस्य सेटो न वृद्धिरिणिञ्णिति कृति च नत्वाचमिकमिवमीनां सेटो मांतस्य धातोर्वृद्धिर्नस्यात् इणि ञिति णिति कृत् प्रत्यये च परे आचमिकमिवमीनां
तु वृद्धिर्भवतीत्यर्थः घञि शमः दमः वुणि शमकः दमकः कथं तर्हि हरेर्यदक्रामि पदैककेन खमिति श्रीहर्षप्रयोग इति चेदुच्यते निहन्तृप्रेषणाद्यन्तोः प्राकृतेर्थे
णिञिष्यते इति प्राकृते ञिस्लत इणू वोध्यः सेटः किम् आगामिकमुकांतो कमेः स्वार्थे ञिङिति ञिङ् वा ञेरिति ञिलोपः काम्यते लुङि॰ ञिङ॰ऽभावे अकामि ञि ञिङोर

इण्वदिटोनदीर्घः ग्राहिता ग्रहीता दर्शिषीष्ट दृक्षीष्ट दर्शिता द्रष्टा अदर्शि अदर्शिषाताम् अदृक्षाताम् शम्यते मुनिना मान्तस्य से
टोन वृद्धिरिणिञ्णिति कृति च नत्वाचमिकमिवमीनाम् अशमि अदमि आचामि अ॰कामि अवामि ण्यन्तात्तु शम्यते मोहो मुनिना
शमयाञ्चक्रे मितां ण्यन्तानामिणिणमि च वादीर्घः शामिता शमिता शमयिता अशामि अशामिषाताम् अशमिषाताम् अशमयिषा
ताम् वध हिंसायां वध्यते जनिवध्योर्न वृद्धिः अवधि भञ्जेरिणि नलोपो वा अभाजि अभञ्जि॰ ॥ ण्यंवं ण्यंतात् शमेः कर्मण्यात् [illegible] सिञिलोपः

शम्यते कासादिप्रत्ययादि त्याम् शमयांचक्रे मितां ण्यंतानां मिणिणमि च वादीर्घः मित्संज्ञिकानां ण्यंतानां धातूनां वा वृद्धिर्भवति इणूप्रत्यये णमूप्रत्यये
च परे इण्वदिटि ञिलोपः वृद्धिश्च वा शामिता पक्षे शमिता पक्षे सिसतेतीटि गुणः शमयिता यङंतप्रकृतिक ञिप्रत्ययान्तात् शंशमेः कर्मण्यात् णौ परतो ऽ राम॰
न पि च हसादिति यलोपः यत इत्यस्य लोपः ततो यकि ञेरिति ञिलोपः शंशम्यते लुटि शंशामिता शंशमिता शंशमयिता लुङि॰ अशंशामि अशंशमि णमू प्रत्य ७३
ये तु शंशामं शंशमं शंशामं शंशमम् वधहिंसायां हसांतः भञ्जेरिणि नलोपो वा भञ्जो आमर्दने इत्यस्य नस्य लोपो वा स्यादिणिप्रत्यये परे ६ ॥

तैतिगुरा: अर्य्यते इ्रणवदिटितुधातोर्नामिनइतिवृद्धिः आरितास्तविंतायाम् गुरोतीतिगुरा: स्मर्य्यतेयजतेः कर्मण्यात् यजामितिसंप्रसारणम् इ्ज्यतेलिटि इ्ते
आशिषिलिङि यक्षीष्ट ॥ ॥ तनोतेर्वायकि तनेराकारांताऽदेशोवास्यात् यक्प्रत्ययेपरे जनेर्वायकिजनेराकारांत आदेशोवास्यात् यकिपरेत पोनेणकर्मकर्त्तर्यं
ऽनुतापेच तपेरिणप्रत्ययोनस्यात् अनुतापेऽर्थेकर्मकर्त्तर्यर्थेच अन्वततप्तदेवदत्तः पापेन कर्त्राऽभ्याहृतइत्यर्थः भावेपीदंवोध्यम् पापेनपापवतापुं
साऽविचार्यकृत्वापश्चादशोचीत्यर्थः कर्मकर्त्तरितुअतप्ततपस्तपस्तइत्यत्रनपस्तपः कर्मकस्येत्यनेनकर्त्तुः कर्मवद्भावः डुदाञ्दानेदादेरित्वंयेइतिदीर्घः दी
यते आतोनपीत्यालोपेदद्दे आतोयुक् आदंतस्यधातोर्युक्स्यात् इणिप्रत्ययेपरे ञितिणितिकृत्प्रत्ययेचपरे घञिदायेः युणिदायकः इ्णवदिटि दायिषीष्ट

तनोतेर्वाआत्वंयकि तायते तन्यते तनिषीष्ट अतानि जायते जन्यते तपोनेणकर्मकर्त्तर्य्यनुतापेच अन्वतप्त देवदत्तः पापेन दादेरिः दीय
ते दद्दे आतोयुक् इ्णिञ्णिति कृति दायिषीष्ट दासीष्ट अदायिषाताम् अदिषाताम् धीयते स्थीयते अग्लायि हन्यते हनोघ्ने घा
निषीष्टवधिषीष्ट घानिताहन्ता अघानि अघानिषाताम् आहसाताम् अवधि अवधिषाताम् ॥ इ्णवदिटोऽभावेदासीष्ट लुङि अदा
यि इ्णवदिटि अदायिषातांतदभावे अपिदा धास्यामितीत्वम् अदिषांतां एवंधा स्याधातूग्लैहर्षक्षये इ्णवदिटि क्ग्लायिषीष्ट हतेः कर्मण्यात् हन्य
ते पूर्ववत्तेरि लिङि हनोलुङ्लिङोरितिवधः यतइत्यल्लोपः वधिषीष्ट पक्षेहनोघ्नइतिघः अतउपधायाइतिवृद्धिः घानिषीष्ट इ्णवद्भावेवधादेशस्यवाधके
ऽयः अत्रहनोघ्हिन्यनेनघदादेशानइणावर्जितेइत्युक्तत्वात् लटि इ्णवदिटि घानिष्यते पक्षेहनृतइतीट्हनिष्यते लुङि इ्णवदिडभावेहनःसिकिदिति
कित्वात्लोपस्त्वनुदात्तनामितिनलोपः आहसातांगृह्णातेः कर्मण्यात् ग्रहामितिसंप्रसारणंगृह्यते ॥

इ्णवदिटोभावे

घ ग्ला
सीष्ट
ग्लायि

सि॰ चं॰ दकोपस्करणादिलक्षणो व्यापारः विक्लित्यादि फलं तयोः फलव्यापारयोरेकनिष्ठतायां एकस्मिन् धर्म्मिण्या श्रयेस्थितौ सत्यामित्यर्थः धातुः सकर्मक उदाहृतः कस

आ॰ ३ तितयोः फलव्यापारयोर्द्धर्म्मिभेदे आश्रयभेदे सति एकस्मिन् धर्मिणि फलमन्यस्मिन्धर्म्मिणि व्यापार इत्यर्थः ॥ ॥ धातोरर्थान्तरे वृत्तेर्द्धात्वर्थेनोपसंग्रहात् प्रसिद्धेर

७२ विवक्षातः कर्म्मणोऽकर्म्मिकाक्रिया कुत्रचित्सकर्मकस्यापि धातोः क्रियाधात्वर्थोऽकर्मिकाकर्मरहिता भवतीत्यर्थः कुतः अन्योर्थ इत्यर्थान्तरं तस्मिन्नर्थान्तरे वृत्तेर्व

र्तनाद्धेतोः यथा नदी वहति स्यंदत इत्यर्थः पुनर्द्धात्वर्थेन कर्मण उपसंग्रहाद्धेतोः जीवति प्राणान् बिभर्तीत्यर्थः पुनः कर्मणः प्रसिद्धेर्हेतोः मेघो वर्षति जलमिति कर्म

धातोरर्थान्तरे वृत्तेर्द्धात्वर्थेनोपसंग्रहात् प्रसिद्धेर विवक्षातः कर्म्मणोऽकर्म्मिका क्रियाः ३ शीङोऽयङ् येङ्किति शय्यते शिश्ये शायिषीष्ट

शयिषीष्ट अशायि अयकि घटः क्रियते त्वन्तु पूर्वीक्रियसे रागैर्विरागैस्सुख्यहं क्रिये चक्रे भाव्यते भावयाञ्चक्रे भावयामासे भावयाम्बभू

वे इट् णिचः दिटि णेर्ल्लोपः भाविता भावयिता भाविष्यते भावयिष्यते अभावि अभाविषाताम् अभावयिषाताम् सान्तात् बुभूष्यते बुभूषा

ञ्चक्रे अबुभूषि यङन्तात् बोभूय्यते बोभूयाञ्चक्रे यङ्लुगन्तात् बोभूयते बोभवाञ्चक्रे बोभाविषीष्ट बोभविषीष्ट स्तूयते विष्णुः अस्ता

वि अस्ताविषाताम् अस्तोषाताम् अर्य्यते आरे आरिषीष्ट ऋषीष्ट आरिष्टाः आर्षाः स्मर्य्यते स्मारिता स्मर्त्ता इज्यते ईजे यक्षीष्ट यष्टा ॥

प्रसिद्धमेव पुनः कर्मणोऽविवक्षातो वक्तुरिच्छाया अभावाद्धेतोः यथा यो हितान्न संशृणुते स किं प्रभुः कुत्सितप्रभुरित्यर्थः वचनमिति कर्माविवक्षितमत्र शीङोऽयङ्

येङ्किति शेतेरयङादेशः स्यात् किति ङिति च यप्रत्यये परे ङित्वादन्तादेशः यत इत्यल्लोपः शय्यते नु धातोरिति यः शिश्ये इण्वद्भावाद्वा वृद्धिः शायिषीष्ट शयिषीष्ट क रामः

तेः कर्मण्यात् उरिति न गुणः ऋषीष्ट ज्यन्ताद्भावयतेः कर्म्मण्यात् णेरिति णिलोपः भाव्यते इण्वदिटि णिलोपः णेर्लोपः स्यात् इण्वदिटि परे णिलोपे भाविता पक्षे ७२

सिमतेतीटि भावयिता सप्रत्ययान्तात् बुभूषतेर्भावे आत् यत इत्यल्लोपः बुभूष्यते यङ्प्रत्ययान्तात् यत इत्यल्लोपे बोभूयतो यङ्लुगन्तात् भावे आत् बोभूयते स्तौतेः कर्म्म

ध्या १

स्वरांतानां हनुग्रह दृशांच भावकर्मणोः सितासीस्यपामिड्वा सइणव चस्वरांतेभ्यो हनिग्रहिदृशिभ्यश्चपरे षां भावे कर्मणि चार्थे स्थिता नां सितासीस्यपां प्रत्ययानां
मिडागमो वा भवति सइट् इणीवेतीणूवत्तु सप्तम्यं ताहृत् कार्यमितिदेशोऽयं इणिपरे यहृद्धयादि कार्यं भवति तदिणव दिटिपरेपीत्यर्थः यथा भाविता भाविष्यते इत्या
दौवृद्धिः दायिता दायिष्यते इत्यादौ युक् घानिता घानिष्यते इत्यादौ घत्वं प्रयोजनकत्वं ताहृनुमेः कर्मण्याख्याते कृते शामिता शमिता शामिष्यते शमिष्यते इत्यादौ
मितान्तनामित्यनेन मितामुपधाया वा दीर्घ इत्यादि इणूतन्यकर्तरिकर्तुरन्योऽकर्त्ता तस्मिन्नकर्तरि भावे कर्म्मणि चार्थे तनू प्रत्यये परे धातो रिणू स्यात् अकर्तरीति
किंमू अकृत घटं कुलालः क्षुगिति तनो लुक् अभावि अकर्मकोपि धातुः कुत्रचिदर्थांतरे सकर्मको भवति धातूनामनेकार्थत्वेनार्थान्तरस्योपसर्गेण द्योतनाद्वेतोः यथा
स्वरान्तानां हनुग्रहदृशांच भावकर्म्मणोस्सितासीस्यपामिड्वा सइणवच्च भाविषीष्ट भविषीष्ट भाविता भविता भाविष्यते भविष्यते अभावि
ष्यत अभविष्यत इणूतन्यकर्तरि धातोस्तनि परे भावे कर्मणि च इणू प्रत्ययस्त्वरपवादः लुक् अभावि अकर्म्मकोऽप्युपसर्गवशात्सक
र्मको भवति सुखमनुभूयते स्वामिना लज्जासत्तास्थितिजागरणम्बृद्धिक्षयभयजीवितमरणम् शयनक्रीडारुचिदीप्त्यर्थं धातुगणन्तम
कर्म्मकमाहुः १ फलव्यापारयोरेकनिष्ठतायामकर्म्मकः धातुस्तयोर्धर्मिभेदे सकर्म्मक उदाहृतः २ ॥ कर्मण्याख्याते स्वामिना सुखमनुभूयते आत्मसा
त्क्रियते इत्यर्थः लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणं शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः १ अकर्मकधातुलक्षणमाह आचा
र्याः लज्जाधातुगणमकर्मकमाहुर्ब्रुवंति तं कं लज्जासत्तास्थितिजागरणान्यर्थाः संति यस्य स लज्जासत्तास्थितिजागरणस्तं अद्कोचेत्यः पुनः वृद्धिक्षयभयजीवितमरणा
न्यर्थाः संति यस्य स वृद्धिक्षयभयजीवितमरणस्तं पुनः शयनक्रीडारुचिदीप्तयोऽर्था यस्य स शयनक्रीडारुचिदीप्त्यर्थस्तं फलव्यापारयोरेकनिष्ठतायामकर्मकः
धातुस्तयोर्द्धर्मिभेदे सकर्मक उदाहृतः सकर्मकाकर्मकधातुलक्षणमाह आचार्यैरकर्मको धातुरुदाहृतः कस्तयां उत्पत्त्यनुकूलो व्यापारो धात्वर्थः तत्रोत्पादना

इतिपदव्यवस्था अथभावकर्मणोर्लडादयः यक्चतुर्षुभुविकर्म्मणीति चाद्भुवीत्यतोनुवृत्तं अव्यवहितमपिकर्त्तरीतिनानुवर्त्तते उत्तरसूत्रेकर्त्तृग्रहणात् आख्यात
प्रकरणादादितश्चतुर्विधेष्वाख्यातेषुचतुरशब्दोस्तितेनभावार्थकेषुकर्मार्थकेषुचचतुर्षुपरतोधातोर्यक्स्यात् आद्भुविकर्म्मणि। भवनंभूः संपदादित्वात्क्विप्
तस्यांभुवि शुद्धधात्वर्थे साध्यरूपेस्वार्थइति फलितं घञर्थोभावस्तुसिद्धरूपः उक्तंचक्रियायाः सिद्धतावस्थासाध्यावस्थाचकीर्तितासिद्धतांद्रव्यमिच्छंतितत्रैवेच्छंति।
यत्र विधिं २ भावोभावनाउत्पादनाक्रियासाचधातुत्वेनसकलधातुवाच्यावर्त्तते. उक्तंच व्यापारोभावनासैवोत्पादनासैवचक्रियेतिउत्पत्त्यनुकूलोव्यापारइत्यर्थः तत्रा।
सिद्धरूपोभावोघञादिवाच्यः तस्यतुसत्वरूपत्वमिष्टमेवेति उक्तंचभाष्यकृता कृदभिहितोभावोद्रव्यवत्प्रकाशतेइतिद्रव्यधर्मान् लिंगसंख्याकारकादीनगृह्णातीत्यर्थः
लिंगसंख्याकारकान्वितंद्रव्यमित्युक्तेःतेनपाकंपाकेनेत्यादौद्वितीयादयः प्रवर्त्तन्तेसाध्यरूपोभावस्त्वाख्यातवाच्यस्तस्यासत्वरूपत्वेनद्वित्वाद्यप्रतीतेर्नद्विवचनादिभा

इतिपदव्यवस्था यक्चतुर्षु धातोर्भावेकर्म्मणिचयक्प्रत्ययस्तिवादिषुचतुर्षुपरतः आद्भुविकर्म्मणि अकर्म्मकाद्भावेसकर्म्मका
त्कर्म्मण्यादृवति भावस्यैकत्वादेकवचनमेव युष्मदस्मदोस्सामानाधिकरण्याभावात्प्रथमः नामाद्यविषयत्वेऽपिप्रथमातिक
मेकारणाभावात्प्रथमः भूयतेभूयेतेभूयन्ताम् अभूयतवभूवे॰ ।। ध्येतुआस्यंतेशय्यंतेइत्यत्रभावेपिवहुवचनंकृतं नचकर्मण्येवाख्यातप्रत्य
योस्त्विति शंक्यं धातुद्वयस्याप्यकर्मकत्वात् आसंतेइत्यासिकाः शय्यंतेइतिशायिकाइत्यत्रधात्वर्थनिर्देशेण्वुणप्रत्ययः उष्ट्रासिकाआसंतेहतशायिकाः शय्यंते
इत्यत्रउष्ट्राणांयाद्दशान्यासनानिहतानांयादृशानिशयनानितादृशानिदेवदत्तादिकर्तृकान्यासनादीनीत्यर्थः फलाश्रयः कर्मफलंचधातुनैवोक्तमित्याख्य
यमात्रमाख्यातार्थः अनन्यलभ्यत्वात् अकर्मकेभ्योधातुभ्योभावेआत् सकर्मकेभ्यस्तुकर्मण्यात् स्यात् साध्यरूपस्यभावस्योत्सर्गतएवसंख्यानपेक्षत्वेनसत्वै राम:
कत्वादेकवचनमेवभवतितत्तुप्रथमस्यैवनमध्यमोत्तमयोः युष्मदस्मदोराख्यातवाच्यकारकवाचित्वाभावात् नाम्नोप्याख्यातवाच्यकारकवाचित्वाभावस्तथा ७१
पिप्रथमोभवति तस्यानिष्पादनेवचनाभावात् तत्रैकवचनस्वीकारः प्रथमपुरुषमंतराकथंसंभवेदित्यर्थः भावेयथाभूयतइत्यादि ।। ।।

गृधिवंचिभ्यांण्यंताभ्यांप्रतारणेपरगामिफलार्थमिदमात्मनेपदम् प्रतारणेकिंश्वानंगर्द्धयति अस्याभिकांक्षामुत्पादयतिअहिंवंचयतिवर्ज्जयतीत्यर्थः अपाह्नुद
अपाह्नुदतेरात्स्यात् अनुपसर्गादूज्ञः पूर्वव्याख्यातं कर्मव्यतिहारेधातोः क्रियाविनिमयेऽर्थेधातोः कर्त्तर्यात्मनेपदंस्यात् व्यतिभवत्ते अन्यस्ययोग्यंभवनमन्यत
रः करोतीत्यर्थः सदानेव्यतिराते नगतिहिंसार्थपठजल्पहसादितरेतरान्योन्यपरस्परोपपदाच्च नगतिहिंसार्थेभ्यः पठजल्पहसेभ्यइतरेतरान्योन्यपरस्परोपपदेभ्य
श्चधातुभ्यः आत्नस्यात् इत्यात् अनुपराभ्यांकृञः पम् आत्मगामिफलेपरस्मैपदार्थमिदम् अभिप्रत्यतिभ्यःक्षिपःक्षिपप्रेरणेस्वरितेत् तस्यात्मगामिफलेपिपर

गृधिवञ्चिभ्यांण्यन्ताभ्यांप्रतारणेमाणवकंवञ्चयते गर्द्धयते अपाह्नुदःन्यायमपवदते समुदाङ्भ्योयमोऽग्रन्थे व्रीहीन्संयच्छते
धान्यान्स्वीकरोतीत्यर्थः भारमुद्यच्छते भारम्वहतीत्यर्थः वस्त्रमायच्छते वस्त्रमादधातीत्यर्थः अग्रन्थेकिम् वेदमुद्यच्छति अधि
गन्तुमुद्यमङ्करोतीत्यर्थः कर्मव्यतिहारेधातोः व्यतिभवते व्यतिराते नगतिहिंसार्थ —— पठजल्पहसात् व्यतिगच्छन्ति व्यतिपठ
न्ति व्यतिघ्नन्तिव्यतिजल्पन्तिव्यतिहसन्ति इतरेतरान्योऽन्यपरस्परोपपदाच्च इतरेतरस्य अन्योऽन्यस्यपरस्परस्यवाव्यतिलु
नन्ति अनुपराभ्याङ्कृञःपम् अनुकरोति पराकरोति अभिप्रत्यतिभ्यःक्षिपःपम् अभिक्षिपन्ति प्रतिक्षिपन्तिअतिक्षिपन्ति प्राद्वहःप्र

स्मैपदार्थमिदम् प्राद्वहः प्राद्वहतेःपंस्यात् परेर्मृषश्च परेर्मृषेःपंस्यात् स्वरितेत्त्वात् परद्वयेप्राप्तेआरंभः मृषआम॥ वहन्ति परेर्मृषश्च परिमृष्यतिप
र्षणेदिवादिश्चुरादिश्चपरिमृष्यति जेरभावेपरिमर्षति चकाराद्वहेरपिपं भवति परिवहति व्याङ्परिभ्योरमः भ्वादौव्याख्यातमिदम् अकर्मकाद्वा अकर्म
कात्रमतेर्वापंस्यात् उपाद्दित्येवउपरमतिउपरमतेवा निवर्त्तते इत्यर्थः बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योण्यंतेभ्यःपंइङ्क्रीजीनामित्यात्वं अध्यापयतिप्राव
यतिप्रापयतीत्यर्थः द्रावयतिविलापयतीत्यर्थः स्रावयतिस्यंदयतीत्यर्थः ॥

उदश्चरः सकर्मकात् धर्म्ममुच्चरते उल्लंघ्य गच्छतीत्यर्थः सकर्मकात् किं बाष्पमुच्चरति उपरिष्टाद्गच्छतीत्यर्थः ॥

सि॰ के॰ समस्तृतीयायुक्तात् तृतीयान्तयुक्तात् समश्चरेरात्स्यात् रथेन संचरते व्यवधानेपि रथेन समुच्चरते दाणश्च साचेच्चतुर्थ्यर्थे तृतीयान्तयुक्तात् संप्रयच्छतेरात्स्या

आ॰ उ॰ त् सा तृतीया चेच्चतुर्थ्यर्थे भवति दास्या संयच्छते दास्यै ददातीत्यर्थः दास्येति संप्रदाने तृतीया उपाद्यमः स्वीकारे उपाद्यमेरात्स्यात् स्वीकारो विवाहस्तस्मिन्नर्थे

७० यमस्सिः किद्वा यमेः परः सिप्रत्ययो वा कित्स्याद्विवाहे ऽर्थे लोपस्त्वनुदात्ततनामिति मलोपः उपायत पक्षे उदायंस्त ज्ञाश्रुस्मृदृशां सानां सप्रत्ययान्तेभ्य ए

भ्य आत्स्यात् अपह्नवे ज्ञ इत्यादिना ज्ञाधातोः समो गमृच्छीत्यनेन श्रुदृशिभ्यां चात्मनेपदे कृते ततः सप्रत्यये सान्तात् पूर्ववदादित्यनेन तदात्मनेपदं सिद्धमे

व पुनर्ग्रहणं विषयान्तरेप्यात्मनेपदार्थं अनो ज्ञ अनुजानाते नेत्यनोः सान्ताज्ज्ञानातेर्नात्स्यात् प्रत्याङ्भ्यां श्रुवः आभ्यां सान्ताच्छृणोतेर्नात् स्वराद्यन्तोपसर्गाद्युजेर यज्ञेस्वरा ।

उदश्चरस्सकर्म्मकात् धर्म्ममुच्चरते समस्तृतीयायुक्तात् रथेन सञ्चरते दाणश्च साचेच्चतुर्थ्यर्थे दास्या संयच्छते कामुकः उपाद्यम

स्स्वीकारे भार्य्यामुपयच्छते यमस्सिः किद्वा विवाहे रामस्सीतामुपायत उपायंस्त वा वे [illegible] अकर्म्मकाच्चवि

कुर्वते सैन्धवाः ज्ञाश्रुस्मृदृशां सान्तानामात् जिज्ञासते शुश्रूषते सुस्मूर्षते दिदृक्षते अनो ज्ञ अनुजिज्ञासति पुत्रम् प्रत्याङ्

भ्यां श्रुवः प्रतिशुश्रूषति आशुश्रूषति स्वराद्यन्तोपसर्गाद्युजेर यज्ञेषु प्रयुङ्क्ते उद्युङ्क्ते अयज्ञे किम् पात्राणि प्रयुनक्ति समः क्ष्णुवः संक्ष्णु

वाते शस्त्रम् भुजोऽपालने ओदनम्भुङ्क्ते पालने

दे स्वरान्ताच्चोपसर्गाद्युजेरात् ननु यज्ञपात्रेर्थे समः क्ष्णुवः समः क्ष्णौतेरात्स्यात् भुजोऽपालने अभ्यवहारे

इति वक्तव्ये अपालने इति पर्युदासग्रहणं प्रयोजनं तद्धार्थसंयोगवद्धि प्रयोगस्यापि विशेषावधारणहेतुत्वात् रोधादिकं सैव भुजेर्ग्रहणमितिकम् अभ्यवहारादर्थान्तरेउ रामः

पभोगादावप्यात्मनेपदं भवतीति सिद्धिनीयं निषेधस्य निवर्त्तिः पर्युदासः भुजेरात्स्यात् पालने ऽपालनत्वात् उपभोगार्थे तु वृद्धो जनो दुःखशतानि भुंक्ते इतीह भुजेरुपभोगो ऽर्थः उपभोगश्च ७०

त्युपलक्षणं तेन वुभुजे पृथिवीपालः पृथिवीमिव केवलामित्यत्रात्मसात्करणमर्थः पृथिवीं वुभुजे स्वाधीनां चकारेत्यर्थः भुजो कौटिल्ये इति तुदादेस्तु पन्नगवाणि विभुजति

संप्रतिभ्यामनाध्याने उत्कंठापूर्वकं स्मरणमाध्यानं शतं संजानीते अवेक्षते इत्यर्थः शतं प्रतिजानीते अंगीकरोतीत्यर्थः अनुपसर्गात्परस्य ज्ञो वा तु स्यात्
वेः शब्दकर्मणः कृञः शब्दं विकुरुते उच्चारयतीत्यर्थः शब्दकर्मणः किम् चित्तम् विकरोति कामः अकर्मकाच्च वेरकर्मकात् कृञ आत् स्यात् विकुर्वते सैंध
वाः वाजिनो विकारं लभंते इत्यर्थः भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः वदते रात् स्यात् एष्वर्थेषु शास्त्रे वदते भासमानो ब्रवीतीत्यर्थः भृत्यानु
पवदते सांत्वयति उपसंभाषा सांत्वनं शास्त्रे वदते ज्ञानं वदति इत्यर्थः क्षेत्रे वदते क्षेत्रे प्रयत्नं वदति इत्यर्थः गेहे विवदंते विवादं विवदंतीत्यर्थः उप
वदते प्रार्थयते उपमंत्रणमुपच्छंदनं रैशुकिं किंचिद्वदति मनुष्यादीनां संभूयोच्चारणे वदते रात् स्यात् मनुष्यादीनां सहोच्चारणेऽर्थे व्यक्तवाग्विषयादनुपूर्वादकर्म

सम्प्रतिभ्यामनाध्याने शतं सञ्जानीते शतम्प्रतिजानीते अनाध्याने किम् मातरं सञ्जानाति अनुपसर्गाद्वा गां जानाति जानीते वा भासनो
पसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः शास्त्रे वदते भृत्यानुपवदते शास्त्रे वदते क्षेत्रे वदते गेहे विवदंते उपवदते [illegible]ः प
रदारान् मनुष्यादीनां सम्भूयोच्चारणे सम्प्रवदन्ते ब्राह्मणाः व्यक्तवाग्विषयादनुपूर्वादकर्मकात् अनुवदते कठः कलापस्य वावि
रुद्धोक्तौ विप्रवदन्ति विप्रवदन्ते वा वैद्याः अवाद्गिरतेः अवगिरते समः प्रतिज्ञाने शब्दं नित्यं सङ्गिरते ।। कात् एतादृशाद्वदते रात्स्यात् व्यक्तवाक्
विषयो यस्य स व्यक्तवाग्विषयस्तस्मात् अनुवदते कठः कलापस्य वेदशाखाप्रवचनावपि कठकलापशब्दौ वर्तते तदध्येतरि वर्तते अनुसादृश्यं कलापस्येति संबंधे ष
ष्ठी अकर्मकात् किम् उक्तमनुवदति व्यक्तवागिति किं अनुवदति वीणा वा विरुद्धोक्तौ विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणेऽर्थे वदेर्वा तु अप्राप्तविभाषेयं अवा
द्गिरतेः गिरतेरिति तौदादिकस्यैव ग्रहणं गृणातेरव पूर्वस्य प्रयोगो नास्तीति भाष्योक्तेः समः प्रतिज्ञाने समो गिरते रात् स्यात् प्रतिज्ञानेऽर्थे संगिरते प्रतिजानीत इत्यर्थः प्रति

वे

वेः शब्दक
र्मणः कृ
शब्दं विकु
रुते अ
कर्मकाच्च
विकुर्वते
सैंधवाः

सि॰ च उपसर्गादस्यत्यूह्योर्वा अकर्मकादितिनिवृत्तं असुक्षेपणे ऊहवितर्के वंधं निरस्यतिदिवादित्वाद्यः उपसर्गादूहतेर्ह्रस्वोयादेकिति ब्रह्मसमुह्यात् अग्निं समुह्य
आ॰ उ तिनि समुपविभ्योह्वः एभ्यः परस्मात् ह्वेञआत् स्यात् स्पर्द्धायामाङः आङः परात् ह्वेञआत् स्यात् पराभिभवेच्छा स्पर्द्धा तस्यां सामर्थ्ये अप्रतिवन्धोत्साहस्फीततायां
६९ सुक्रमः अचिक्रमतेबुद्धिर्नप्रतिहन्यतइत्यर्थः अध्ययनायक्रमते उत्सहत इत्यर्थः क्रमंते ऽस्मिन् शास्त्राणि स्फीतानि प्रवृद्धानि भवंतीत्यर्थः उपपराभ्यां अप्रति
वंधादिषु वाच्येष्वाभ्यां क्रमआत् स्यात् नेह संक्रामति आङोज्योतिरुद्गमने आक्रमते सूर्य्यः उदयते इत्यर्थे नेह आक्रामति धूमो हर्म्यतलात् वेः पादविहरणे
क्रमेः पादविक्षेपए वार्थ स्तथापि धातूनामनेकार्थत्वादेवमुक्तं पादविहरणे किम् विक्रामति संधिर्द्विधा भवति स्फुटतीत्यर्थः प्रोपाभ्यां प्रारंभार्थाभ्यां प्रक्रमते म १
उपसर्गादस्यत्यूह्योर्वा निरस्यते निरस्यति वा निरास्थत समूहति समूहते समुह्यात् निसमुपविभ्योह्वः निह्वयते स्पर्द्धायामा
ङः कृष्णश्चाणूरमाह्वयते अप्रतिवन्धोत्साहस्फीततासु क्रमः अचिक्रमतेबुद्धिः अध्ययनायक्रमते क्रमन्ते ऽस्मिन् शास्त्राणि उपप
राभ्याम् उपक्रमते पराक्रमते आङोज्योतिरुद्गमने आक्रमते आक्रम्यते सूर्य्यः वेः पादविहरणे साधु विक्रमते वाजी प्रोपाभ्या
म्प्रारम्भार्थाभ्याम् प्रक्रमते उपक्रमते अनुपसर्गाद्वा क्रमते क्रम्यते क्राम्यति क्रामति अपन्हवेज्ञः शतमपजानीते अकर्मकाच्च
आरंभकरोतीत्यर्थः प्रारंभार्थाभ्यां किम् प्रक्रामति गच्छतीत्यर्थः उपक्रामत्यागच्छतीत्यर्थः उपपराभ्यामिति नात्रात्मनेपदं श्री सर्पिषोजानीते ॥ अनुपस
कं अप्रतिवंधादिष्वेवेत्युक्तत्वात् अनुपसर्गाद्वा अप्राप्तविभाषेयमप्रतिवंधादिषु तु नित्यमेव अपह्नवेज्ञः अपलपने ऽर्थे ज्ञआत् अकर्मकाच्च सर्पिषो जानीते स र्ग जा॰
पिषोपायेन प्रवर्त्तत इत्यर्थः अनुपसर्गात् ज्ञः अकर्मकाच्चेत्येव सिद्धेः सकर्मकार्थमारंभः अनुपसर्गात् किम् स्वर्गं लोकं न प्रतिजानाति कथं तर्हि इत्यपः सू रामः ने
र्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्येति भट्टिः कर्मणि लिट् नृपेणेति विपरिणामः ॥ कुध्यन् कुलं ध्वदपतिविप्रवाः ६९
पास्यन् सुत ता[illegible]पति मां[illegible]

गमेर्कसादिसिस्यैाकितौवागमेरनिटोसिसौवाकितौस्तः आशिषिलिङि कित्वाल्लोपस्त्वनुदात्ततनामितिमलोपः संगसीष्टपक्षे संगंसीष्ट लुङि कित्वान्मलोपे लोपोह्र
स्वादितिसिलोपः समगत समगसातां समगसत कित्वाभावे समगंसातां समगंसत तौदादिकस्य ऋच्छेरत्र ग्रहणं न तु ऋच्छादेशस्येति ध्वननार्थं लटः प्रयोगः सम।
च्छिष्यते ग्रहामिति संप्रसारणं संपृच्छते स्वरत्यादिपनायेः संस्वरते अर्तीति भौवादिकजौहोत्यादिकयोर्ग्रहणं तत्र भ्वादेः समृच्छते लिटि समाराते समारिरे लिङि
उरित्गुणः समृषीष्ट समर्त्तादन्तद्वलाट् समरिष्यते समारिष्यत लुङि मेटङ्इत्यटोऽभावः उरितिन गुणः लोपो ह्रस्वादिति सिलोपे मासमृत मासमृषातां मासमृष
त माङ्ऽभावे समार्त्त समार्षातां समार्षत इयर्त्तेस्तु अर्तेरिः पूर्वस्येति पूर्वस्यत्वे असवर्णस्वरे पूर्वस्येतीयङ् समियृते लुङि सर्तिशास्त्यर्तिभ्यश्चेति ङः ऋवर्णदृशोरिति

गमस्थि स्यैकितौ वा सङ्गसीष्ट संगंसीष्ट समगत समगंस्त समृच्छते समानृच्छे समार्च्छिष्ट संस्वरते संसस्वरे संस्वरिषीष्ट संस्व-
षीष्ट समस्वरिष्ट समस्वृत समृच्छते समन...ष्ट समप्रक्षातां संशृणुते संश्रोता समश्रोष्ट सम्विन्ते संविदाते वेतेरन्तो वा रुड्वाति
सम्विदते सम्विद्रते सम्पश्यते समदृष्ट समृच्छते समारे समियृते ॥ अर्तेरिः पूर्वस्य समियृत समियृयातां समियृतां स्व
रादेः अदृएएऐ समैषत समैषातां अकर्मकात्किम् ग्रामं सङ्गच्छति ॥ गुणः मेटङ्इत्यङभावः मासमरत मासमरेतां मासमरंत माङ्ऽ

भावे समारत समारेतां समारंत श्रुवः श्रश्चादेश इति शृनुप्रत्यये ध्रेसंशृणुते परस्मैपदस्याह च ध्यांहि दशानेद्युत्वस्यैव ग्रहणं न तु स्वरितेतो विदू लाभे इत्यस्य स
ताविचारणार्थस्य विदेस्त्वनुदात्तत्वादात्मनेपदं सिद्धमेव वेतेरन्तो वा रुट् विदेः परस्यांत प्रत्ययस्य रुड्वा स्यात् दृशेदेरिति पश्यः संपश्यते कथं तर्हि सकर्मकस्य
...सीति पुरापि संशृणुमहे इति मुरारिप्रयोगः प्राग्वादिकोयमिति कथयंद् श्यइत्यऽध्याहारो वा अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतो
...चिन्ह्यगुणा तारथीतरे ह्रन्नेर्धीन्वर्थेनोपसंग्रहात् प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेत्युक्तत्वादकर्मकत्वं बोध्यम् ॥ ॥

सि॰ चे॰ त्रीं द्रोतीत्यर्थः पंथाः स्रुघ्नो देशमुपतिष्ठते प्राप्नोतीत्यर्थः वा लिप्सायां प्रभुमुपतिष्ठते लिप्सयोपगच्छतीत्यर्थः ॥ ॥ अकर्मकाच्च उपात्तिष्ठतेरकर्मकादात्म
आ॰ उ॰ नेपदं स्यात् भोजनकाले उपतिष्ठते सन्निहितो भवतीत्यर्थः उद्विभ्यां तपोऽकर्मकात्स्वांगकर्मकाच्च स्वमंगं स्वांगं नत्वद्रववदिति परिभाषितं उत्तपते वितपते दी
६७ प्यते इत्यर्थः नेह सुवर्णमुत्तपति संतापयति विलापयतिवेत्यर्थः चैत्रो मैत्रस्य पाणिमुत्तपति संतापयतीत्यर्थः आङो यमहनिभ्यां आङः पराभ्यामकर्मका
भ्यां स्वांगकर्मकाभ्यां च यमहनिभ्यामात् नेह परस्य शिरः आहंति कथं तर्हि आजघ्ने विषमविलोचनस्य वक्ष इति भारविः आहध्वं मा रघूत्तममिति भट्टिश्च प्र
मादएवायमिति समीपमेत्यध्याहारो वा वोप्य विषमविलोचनस्य समीपमेत्य वक्ष आजघ्ने स्वकीयमेव वक्षो मल्लइव संतोषातिशयादास्फोटनं चक्रे इ

अकर्म्मकाच्च ज्ञानमुपतिष्ठते उद्विभ्यान्तपोऽकर्म्मकात्स्वाङ्गकर्म्मकाच्च उत्तपते वितपते पाणिं शिरो वा आङो यमहनिभ्यांम
कर्म्मकाभ्यां स्वाङ्गकर्म्मकाच्च आयच्छते आहते पाणिं शिरो वा आघ्नाते आहसे अन्यत्र शत्रुमायच्छति आहन्ति वा हनः सिः
कित् वधो वाति आवधिष्ट आवधिषातां आहत आहसातां यमस्सूचने सिः कित् उदायत उदायसातां उदायसत
समो गमृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिदृशिभ्योऽकर्म्मकेभ्यः सङ्गच्छते ॥ त्यर्थः हनः सिकित् हंतेः परः सिप्रत्ययो वा कित् स्यात् हनो
लुङ् लिङोरिति वधादेशः आवधिष्ट आवधिषातां पक्षे कित्वात् लोपस्त्वनुदात्ततनामिति मलोपः लोपो ह्रस्वादिति सिलोपः आहत :आहसा
ं आहसत यमः सूचने सिः कित् सूचनं परदोषाविष्करणं कित्वात् लोपस्त्वनुदात्ततनामिति मलोपः लोपो ह्रस्वादिति सिलोपः उदायत सूचने किं राम
उदायंसत पादमाकृष्टवानित्यर्थः समो गमृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिदृशिभ्यः समुपसर्गादकर्मकेभ्यो गमृच्छत्यर्तिश्रुदृशिभ्यः प्रच्छिस्वरतिविदिभ्यः ६७
सकर्मकेभ्य आत्स्यात् संगच्छते संगतं भवतीत्यर्थः ॥ ॥ ॥ ॥

उपकिरति अत्र हर्षे सत्यपालेखनाऽभावात् सुडोऽप्राप्तिः ॥ ॥ आङि नुप्रच्छ्योः आङः परावेतावात्वं तौ भवतः पृच्छतौ अद्रादिः प्रच्छ ज्ञीप्सायां नुदादिः शपउ
पालंभे आक्रोशार्थात्स्वरितेतः शपः परगामिफले शपथरूपेऽर्थे आत्मनेपदं भवति कृष्णायशपते श्लाघन्हुङिति संप्रदानसंज्ञा समवप्रविभ्यः स्थः हुङिअ
पिपृच्छास्यामि इति इत्वं समस्थिषातां आङः प्रतिज्ञायां शब्दं नित्यमातिष्ठते नित्यत्वेन प्रतिजानीते इत्यर्थः स्वाभिप्रायाऽऽविष्करणे निर्णेत्राऽऽश्रयायां च स्थाश्र
यस्य प्रकाशने विवादस्य निराकरणकर्त्री निर्णेता तस्मिन्नर्थे च तिष्ठते रात्स्यात् गोपी कृष्णाय तिष्ठते स्थित्यानेत्रादिविकाराद्वा स्वाभिप्रायं ज्ञापयति संशय्य
आ[illegible] नुप्रच्छ्योः आ नुते आ पृच्छते शपउपालम्भे विप्राय शपते समवप्रविभ्यः स्थः संतिष्ठते समस्थित अवतिष्ठते प्रतिष्ठते विति
ष्ठते आङः प्रतिज्ञायाम् शब्दं नित्यमातिष्ठते स्वाभिप्रायाविष्करणे निर्णेत्राश्रयायां च गोपी कृष्णाय तिष्ठते अस्थित संशय्य कर्णादिषु
तिष्ठते यः उदोऽनूर्ध्वकर्म्मणि ईहायाम् मुक्तावुत्तिष्ठते उदस्थात् स्तम्भोस्सलोपः उत्थासीष्ट उत्थासीयास्तां उदस्थास्यत उदस्थित अनूर्ध्व
कर्म्मणि किम् पीठादुत्तिष्ठति ईहायाङ्किम् ग्रामाच्छतमुत्तिष्ठति उपान्मन्त्रकरणदेवपूजासङ्गतिकरणमित्रकरणपथिषु आग्नेय्याग्नीध्र
मुपतिष्ठते मन्त्रकर[illegible]णे किम् भर्तारमुपतिष्ठति यौवनेन आदित्यमुपतिष्ठते गंगायमुनामुपतिष्ठते रथिकानुपतिष्ठते स्रुघ्नमुपतिष्ठते पन्थाः
कर्णादिषु तिष्ठते यः संशयं विधाय निर्णेतृत्वेन कर्णादीनाश्रयते इत्यर्थः उदोऽनूर्द्ध्वकर्मणि ईहायां इच्छापूर्वि(वा लिप्सायाम् भिक्षुः प्रभुमुपतिष्ठते उपतिष्ठ
[illegible]विषयार्द्धाद्बहुस्यामिवनेह ग्रामाच्छतमुत्तिष्ठति उत्पद्यते इत्यर्थः उपान्मंत्रकरणदेवपूजासंगतिकरणमित्रंकरणपथिषु एष्वर्थेषु उपात्तिष्ठतेरात्स्यात् मंत्रकरणं य
त्रैतन्मंत्रकरणं स्तुतिः आग्नेय्याऽऽग्नीध्रमुपतिष्ठते अग्निदेवताकया ऋचाऽऽग्नीध्रमग्निविशेषं स्तोतुं तत्समीपे तिष्ठतीत्यर्थः अग्निमिंधे इति अग्नीन्धकिवंतः अग्नी
धः स्थानं समग्नीध्रं तस्योप्याग्नीध्रः निपाननात्तद्धितोरण् प्रत्ययः मंत्रकरणे किं भर्तारमुपतिष्ठति यौवनेन आदित्यमुपतिष्ठते आदित्यं स्तोतुं तदभिमुखतयातिष्ठतीत्य

सि॰चं॰ आ॰उ॰ ६७

निः॥कं न विशति अर्थवद्ग्रहणात्लक्षणप्रतिपदोक्तपरिभाषाभ्यां नेरुपसर्गस्य ग्रहणं तेनेह न मधुनि विशंति भ्रमराः॥ ॥ परिव्यवेभ्यः क्रियः परगामिफ
लार्थमिदमात्मनेपदं विपराभ्यां जेः आभ्यां परो जयतिरात्वान् आङो दो ऽनास्यविहरणे नतु विकसने परगामिफलार्थमिदं आङ्पूर्वाद्ददाते र्मुखविकसनादन्यत्रार्थे
वर्तमानाद्धातोरात्मनेपदं स्यात् विद्यामादत्ते क्रीडो ऽनुसंपरिभ्यः तृतीयार्थे स्यात् नो योगे नात्मनेपदं माणवकमनुक्रीडति तेन सहेत्यर्थः समो ऽकूजने सम
पूर्वात् क्रीडतिरात्वान् अकूजनेर्थे आगमेः क्षमायां आङ्पूर्वान्नित्यं गमेरात्मनेपदं स्यात् क्षमायामर्थे आगमयस्व तावत् मात्वरिष्ठा इत्यर्थः शिक्षेर्जिज्ञासायाम् शि
क्ष विद्योपादाने इत्यस्य नेह ग्रहणं अनुदात्तत्वादेवात्मनेपदसिद्धेः किंतु शकेः सोन्तस्येह ग्रहणं धनुषि शिक्षते धनुर्विषये ज्ञानेन शक्तो भवितुमिच्छतीत्यर्थः

परिव्यवेभ्यः क्रियः परिक्रीणीते विक्रीणीते अवक्रीणीते विपराभ्यां जेः विजयते व्यजेष्ट पराजयते आङो दो ऽनास्यविहरणे नतु विकसने विद्यामा
दत्ते आदित्त विकसने तु व्याददाति मुखं क्रुद्धः परस्य कर्मकाद्वदन्त्येव व्याददते पिपीलिकाः पतंगस्य मुखम् क्रीडो ऽनुसं[illegible]रि
भ्यः आक्रीडते अनुक्रीडते परिक्रीडते समो ऽकूजने संक्रीडते कूजने तु संक्रीडति रथचक्रम् आगमेः क्षमायाम् आगमयस्व तावत् शिक्षे
र्जिज्ञासायाम् धनुषि शिक्षते हरतेर्गतताच्छील्ये पैतृकमश्वा अनुहरन्ते मातृकं गावः किरतेर्हर्षजीविकाकुलायकरणेषु अपाकिरते
सुट् चतुष्पाच्छकुनिकर्तृके आलेखने अपस्किरते वृषो हृष्टः कुक्कुटो भक्षार्थी श्वा आश्रयार्थी च हर्षादिष्विति किम् अपकिरति कुसु

हरतेर्गतताच्छील्ये गतं प्रकारः सादृश्यमिति यावत् पैतृकमश्वा अनुहरंते मातृकं गावः पितुर्मातुश्च सादृश्यं सततं परिशीलयंतीत्यर्थः ताच्छील्ये किं मा
तुरनुहरतीह सादृश्यमात्रं विवक्षितं न तु प्रकारता च्छील्यं किरतेर्हर्षजीविकाकुलायकरणेषु किरते रात्मनेपदं स्यात् एषु वाच्येषु हर्षादयो विषयाः तत्र हर्षो
विक्षेपस्य कारणं नि तरफले अपात् सुट् चतुष्पाच्छकुनिकर्तृके आलेखने अपाकिरतेः सुट् स्यात् हर्षादिष्वेव च चतुष्पाच्छकुनिकर्तृके आलेखने सति अ
पस्किरते वृषो हृष्टः हर्षेण भूमिं विलिखतीत्यर्थः हर्षादिष्विति किम् अपकिरति कुसुमं इहात्मनेपदं हर्षादिमात्रविवक्षायांयद्यप्यात्मनेपदं प्राप्तं तथापि सुडः

५२ ॥ माधवीयधातुवृत्तिः ॥

रस ६७

इतिनामधातुप्रक्रिया॥ॐ॥ कंड्वादिभ्योयक्स्वार्थेएभ्योधातुभ्योनित्यंयक्स्यात् स्वार्थेकंड्वादयोद्विधाधातवः प्रातिपदिकानिचनाम्नांतुविग्रहएवसपर्पूजा
यां यगंतात् षिद्भिदामङ् इत्यनेनाङ् प्रत्ययेआप् सपर्या महीङ् पूजायांमहीयतेपूजांलभते इत्यर्थः आकृतिगणोयंइतिकंड्वादयः कंडूयतेः सप्रत्ययेद्विश्चे
तिप्रथमस्यद्वित्वेप्राप्तेकंड्वादेस्तृतीयस्यद्वित्वंकंडूयियिषति यप्रत्ययान्तात् सप्रत्ययेतुयथेष्टंनामधातुषुद्वित्वमित्याद्यानांत्रयाणामन्यतमस्यद्वित्वंभवा
तिस्वादेस्त्वाद्येतरस्यद्वित्वंपुत्रीयितुमिच्छतिपुपुत्रीयिषति पुतित्रीयिषतिपुत्रीयियिषतिअशिश्वीयि षति अश्वीयियिषति आत्मनः इंद्रमिच्छतिइन्द्रीय

इतिनामधातुप्रक्रिया॥ॐ॥ कण्ड्वादिभ्योधातुभ्योयक्स्वार्थे कण्डूञ् गात्रविघर्षणे कण्डूयति कण्डूयते मन्तु अपराधेरोषेचमन्तू
यति निदित्येकेमन्तूयतेवल्गु पूजामाधुर्ययोः वल्गूयति असु असु असूञ् उपतापे असूयति अनेपिच हसात् असाच्च कारअसूय
ति असूयते लेलादीप्तौलेलायतिमेधाशुग्रहणे मेधायतिसुखः दुखः तत्क्रियायाम् सुख्यतिदुःख्यति सपर पूजायाम् सपर्य्यति
सपराज्वकारभिषज् चिकित्सायाम् भिषज्यति इषुधशरधारणे इषुध्यति इषुधीन् गदगद् वाक्स्खलने गद्गद्यति एला खेला विला
सेएलायति खेलायति हृणीङ् रोषणेलज्जायाञ्च हृणीयते महीङ् पूजायाम् महीयते अगद निरोगत्वे अगद्यति आगदीत्॥ॐ॥

इतिकण्ड्वादयः॥ निविशादेःन्यादिपूर्वाद्विशादेर्धातोरात्मनेपदंस्यात् तिंइन्द्रीयतेः सप्रत्ययेद्रीशब्दयिशब्दयोरन्यतरस्यद्वित्वंइंदिद्रीयिषति
इंद्रीयियिषतिण्यंतात्सप्रत्ययेतुप्रियशब्दात् आविष्ठवद्भावेनप्रियशब्दस्यप्रादेशस्ततोद्वित्वादिप्रियमाख्यातुमाचक्षाणंप्रेरयितुंवेच्छतिपिप्रापयिषा
ति प्रापिपयिषति प्रापयियिषति यङ् सन्नंतात्सप्रत्ययेतुबोभूयिषतियङ् जिसंतात् जिप्रत्ययेतुबोभूययिषति इतिप्रत्ययमालानिविशादेः निपूर्वोविशः नेः
परोविश इतिवानिविश आदिर्यस्यसनिविशादिस्तस्मात्तस्मात् आदिशब्दः प्रकारेविश इत्यत्र अकारउच्चारणार्थः निविशंतेयदिश्वकशिखापदइतिश्रीहर्षः॥

सि॰च॰
श्रा॰उ॰
६६

॥२२

विद॰,तीत्यपरे उदंचमाचष्टेश्राविषूवङ्ग्वात् तिरश्चादयदृत्युदीचुउदीचयतीत्यत्रोपसर्गपृथक्कृत्यर्दूचशब्दादेवञिः बहुलग्र॰णादिलोपोन लुङि॰ उपसर्गसमा-
नाकारमिति।कारात्पूर्वं मटि चिशब्दस्यद्वित्वे पश्चात्नेरितित्रिलोपः उदेचिचत् प्रत्यंचमाचष्टेश्रचेर्दीर्घश्चेत्यः ल्लोपपूर्वदीर्घोप्रतीचयति लुङि॰ चिशब्दात्प्रागटि
इत्पूर्वस्ययत्वंयत्यचिचत् न्तृणामसवर्णस्वरइतिप्रकृतिभावपक्षेतुप्रतिचिचत् सम्यंचमाचष्टेश्रचेर्दीर्घश्चेत्पलोपपूर्वदीर्घौसमीचयति लुङि॰ समचिचत्
प्रकृतिभावपक्षेसमिश्रचिचत्तिर्यञ्चमाचष्टेश्रचेष्टिलोपेनाः पदारेपितएवहिरंगत्वेनासिद्धत्वात्तिरोत्यस्यसङ्गावःवृद्धौसत्यांतिरायतिउपसर्गसमानाकारत्वा-
भावादिहनिरसः पृथक्करणंनास्तिश्रतितिरायत् श्रडिलघाविति ह्रस्वसनाः स्मृलोपित्वात् सध्र्यंचमाचष्टेटिलोपेनांचेरपहारेवृद्धौसत्यांसध्रायतिश्रंतिकमाच-

विदावयतिइत्यपरे अविविदावत्विदयति इत्यन्ये अविविदत् एवंश्वानमाचष्टेश्वयति अशिश्वत् शावयत्यपरे अशुशावत् शुन
यतीत्यन्ये अशुशुनत् उदञ्चम् उदीचयति॰ अचिचत् प्रत्यञ्चम् प्रतीचयतिप्रत्यचिचत् सम्यञ्चम् समीचयतिसम्यचिचत् तिर्यञ्चम्
तिरायति अतितिरायत् सध्र्यञ्चम् सध्रापयति असस्रधायत् अन्तिकम् नेदयति अनिनेदत् बाढम् साधयति वृद्धम् ज्यापयति अजिज्या-
पत् वृद्धंवर्षयति स्फिरम् स्फापयति अपिस्फपत् उरुम् वरयति बहुलम् बंहयति प्रम् त्रपयति दीर्घम् द्राघयति अदद्राघत् वृंदारकम् वृ-
न्दयति अववृन्द
ते गुर्वादेरित्यंतिकस्य नेद इति लोपश्च यस्येत्यः लोपः नेदयति लुङि॰ अनिनेदत्बाढमाचष्टेबाढस्यसाधः साधयति अससाधत् वृद्धमा-
चष्टेवृद्धस्यज्यादेशः राती आविति पुक् ज्यापयति अजिज्यपत् वृद्धस्यवर्षोपिवर्षयति अववर्षत् स्फिरमाचष्टेस्फिरस्यस्फः वृद्धौसत्यांरातीआविति पुक् स्फाप-
यति अपिस्फपत् उरुमाचष्टेउरुशब्दस्यवरसंज्ञापूर्वकविधेरनित्यत्वाद्बाहुलकाद्वामाधवेनविकल्पेन वृद्धिरुदाहृता वरयति अवीवरत् बहुलमाचष्टेबहुलस्य
बंहः बंहयति नोलोपइतिनलोपोनश्रप्लृलोपित्वातनदृत्वदीर्घौ अबबंहत् प्रमाचष्टेत्रप्रस्यत्रप त्रपयति अतित्रपत् दीर्घमाचष्टेदीर्घस्यद्राघः द्राघयति अदद्राघत्

एमः
६६

चीवरादर्जनेपरिधानेवाणिङ् चीवराण्यर्जयतिपरिधत्तेवासंचीवरयतेलुङि समचिचीवरत अर्थवेदसत्यानामापुग् ओरथामापुगागमः स्यात् णिप्रत्यये परे अर्थमा
चष्टेकरोतिवाअर्थापयति एनीभावश्चेणिप्रत्ययेटिलोपः ततोनिमित्ताभावेनैमित्तकस्याप्यभावः इतीयोऽभावेनस्याप्यभावः एतयति पृथुमाचष्टेऋरमनीतिरभावे
टिलोपेचप्रथयति लुङि इद्धोसत्यांटिलोपः अपृलोपित्वाऽभावादङि लघाविति पूर्वस्येत्वं अपिप्रथत् इद्धे पूर्वटिलोपेनाग्लोपित्वादित्वंन अपप्रथत् मृदुं
आचष्टेऽजाविष्टवद्भावात् अर मनीतिरभावेटिलोपेचम्रदयति एवंभृशकृशदृढादयः वांमांवाऽऽचष्टे टिलोपेतन्मदेकत्वेइतित्वन्मदादेशेचकृते अतउपधा

चीवरादर्जनेपरिधानेच चीवराणि अर्जयति परिधत्तेवासंचीवरयतेभिक्षुः [...] अर्थवेदसत्यानामापुक् अर्था
पयति आर्तीथपत् वेदापयतिसत्यापयति [...]त्तिसत्पयत् एतयति ऐतत पृथुम्प्रथयति इद्धोसत्याम्पूर्वम्वाटिलोपः अपप्रथत्
अपिप्रथत् मृदुम् म्रदयति अमम्रदत् अमिम्रदत् भृशंभ्रशयति अवभ्रशत् कृशंक्रशयति अचक्रशत् दृढम् द्रढयति अद
द्रढत् परिव्रढयति पर्यव्रढत् त्वादयति अतित्वदत् मादयति अमीमदत् युष्म यति अयुयुष्मत् अस्मयति आसिस्मत् विद्वा
धायाइति इद्धोत्वादयति मादयतियुवामावांयुष्मानस्मान्वाचष्टे विभक्तिपरत्वाऽभावान्नयुवावौ टिलोपेसतियुष्म(संविद्वयति अविविद्वत्॥
यति अस्मयति श्वानमाचष्टेऽजाविष्टवद्भावात् शुनौऽस्यउर्वाचंदीर्घे इत्युत्वेटिलोपाभावेचशुनयतीति रूपंकेचिदाहुः टिलोपेउत्वेचइद्धोसत्यांशावय
तिलुङि अग्लोपित्वान्नह्रस्वः अशुशावत् विद्वांसमाचष्टेटिलोपेविद्वयति टिलोपेकृतेवसोर्वउरित्युत्वे इद्धावायादेशेचविद्वायतीत्यन्येनिभ
त्यत्वात्पूर्वमुत्वंपश्चाट्टिलोपः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गौ

ऊष्मवाष्पधूमेभ्य उद्वमने एभ्यः कर्मभ्यो यङ् ऊष्माणमुद्वमति नाम्नो नो लोपः शिति नस्य लोपः ये इति दीर्घः ऊष्मायते णिडिन्करणे तत्करोति तदाचष्टे वेत्यर्थे ना
म्नो णिः स च ङित् ङिति टेरिति ङित्वाट्टिलोपो भवति घटमाचष्टे घटयति लुङि अप्लोपित्वादाजघटत् पटुमाचष्टे पटयति लुङि परत्वाद्वृद्धौ सत्यां टिलोपः अपीपटत् भा
येतु हे दीर्घो वलीयानिसुक्तं तेन पूर्वं लोपसन्नाप्लोपित्वान्नाङ्कार्यं अपपटत् महान्तमाचष्टे माहयति आविष्ठवत्कार्यं दृष्टं प्रत्यये परतो यत्कार्यं दृष्टं संभावितं च तत्
त्राण्णौ न्याव्यमिति दिश्यते दृष्टेष्टयथाविन्मतुनो लोपो वोगुर्वादेरेगराज्ञादेशादिलोपो न दृन् आवपिसुः स्रग्विणमाचष्टे स्रजयति अग्निमन्तमाचष्टे अग्नयति दण्डवन्तमा
ऊष्मवाष्पधूमेभ्य उद्वमने ऊष्मायते वाष्पायते धूमायते णिडिन्करणे नाम्नो णिः प्रत्ययः करणेऽर्थे स च ङित् पटुं करोति घटयति पटयते
अजघटत् पटयति पटयेत अपपटत् अप्लोपिनो नाङ्कार्यम् महान्तं करोति माहयति अममाहत् युवानं करोति यवयति अयूयव
त् कनयति अचीकनत् आविष्ठवत्कार्यम् [illegible]
[illegible]
[illegible] स्थूलमस्य वयति अतुस्थवत् दूरमा दवयति अदुदवत् ह्रसयति अजिह्रसत् ॥ १९ चष्टे दंडयति लुङि अससजत् अत्र पूर्व
स्य दन्तं तु न भाष्यासंमतत्वात् अजिग्नत् अददंडत् स्थूलं करोति स्थूलदूरयुवादेरिष्ठेमेयस्सु गुणदेशस्य लोपश्चेति स्थूलस्य स्थेष्ठि लोपाभावश्च स्थवयति लुङि अतु
स्थवत् आदेशानपवादत्वान्नयः दूरं करोति दूरस्य दोः दवयति लुङि अदूदवत् कथं तर्हि दूरस्य सः वनते विवसतीति दूरमतनीति दूरात्किं वनः ते कुर्वतीत्यर्थः
युवानं करोति युवन् शब्दस्य यो यवयति युवाल्पयोः कन्वेति कनं कनयति लुङि अयूयवत् अचीकनत् णिडिदिति सूत्रे च हलग्रहणं कर्तव्यं तस्मादिह सर्व
त्र ह्रस्वभावः ह्रस्वं करोति ह्रस्वस्य ह्रस संज्ञापूर्वकविधेरनित्यत्वाद्वृद्धिग्रहणाद्वानवृद्धिः माधवेन तु विकल्पेन वृद्धिकृता तेनो ह्रसयति अजिह्रसत् ॥ १

31½ × 14.8
पत्र = 43

सिद्धान्त चन्द्रीका

ग्र ३५९३

सि॰चं॰ क्षिप्रं करोति क्षिप्रस्य क्षेप् क्षेपयति अचिक्षिपत् क्षुद्रं करोति क्षुद्रस्य क्षोदः क्षोदयति अचुक्षुदत् प्रियं करोति प्रियस्य प्रः धातोर्नामिन इति वृद्धौ रातो ना वितिप्
आ॰ऊ॰ कुग्रापयति अपिप्रपत् गुरुं करोति गुरोर्गर् गरयति अजीगरत् स्थिरं करोति स्थिरस्य स्थः स्थापयति अतिस्थपत् वहन् इति स्तौ ऊढिं करोति ऊढयति ऊढि
६४ आख्यत् औडिढत् अङि पूर्वस्य जो वा पूर्वरूपस्य स्य उकारस्य जो वा भवति अङ् प्रत्यये परे औजिढत् ऊढं करोति ऊढयति लुङि ढिलोपे च सति जिसहितस्य द्वि
त्विपश्चात् पूर्वो ऽकारो ह्रस्वः अतो जिनिमित्तः स्वरादेश इत्यनेन ढस्य द्वित्वं ऊढमाख्यत् औडढत् जनेरौजढत् कर्तुर्यङ् आचारे उपमानादित्यत उपमानादित्यनु

क्षिप्रम् क्षेपयति अचिक्षिपत् क्षुद्रं करोति क्षोदयति अचुक्षुदत् प्रियं करोति प्रापयति अपिप्रपत् गुरुं करोति गरयति अजीगरत्
स्थिरं करोति स्थापयति अतिस्थपत् ऊढिं करोति ऊढयति नेरङ् द्वित्वस्वरादेशः परः अङि पूर्वस्य जो वा औजिढत् औडिढत् ऊढं क
रोति ऊढयति औजढत् औडढत् कर्तुर्यङ् उपमानात्कर्तुराचारार्थे यङ् श्येन इवाचरति श्येनायते काकः पण्डितायते मूर्खः एताय
ते यङ् मानिनोः पुम्वत् यङि वा सलोपः पयायते पयस्यते वा तक्रम् अप्सरस् ओजस् सुमनसां नित्यम् अप्सरायते ओजायते दुर्बलः।
सुमनायते नाम्न आचारे क्विवा कृष्ण इवाचरति कृष्णाति अकृष्णीत् अइवाचरति अति अनः अन्तिएत् एताम् एयुः अतु अतात् अता

६६ राम नुहते आचारे इति च उपमानात् कर्तुर्नाम्न आचारे यङ् आदसुदात्तङि तङ् इत्यात् श्येन इवाचरतीति यङ् मानिनोरिति पुंवत् ((भू अन्तु अतात् आत् आनुआः
यदि इति दीर्घः श्येनायते यङि वा सलोपः सान्तस्य कर्तुः समस्य वा लोपः अप्सरस् ओजस् सुमनसां नित्यम् ओनः शब्दस्त इवति द्वौ ओजस्वी वाचरतीति ओजा
यते नाम्न आचारे क्विप् वा कर्तुरुपमानान्नाम्नः क्विप् वा स्यात् आचारे ऽर्थे नामतं स्मिवतन्याह्यते न विभक्त्याश्रितं कार्यं पक्षे यङ् कृष्ण इवाचरतीति सधातुरिति
धातुत्वात्तिवादिः अदेद्रुत्यलोपः कृष्णति अकृष्णत्स इवाचरति अदेद्रुत्यलोपः अतिलिटितु कासादित्यमाशिषि सत्रस्य दन्तो प्रत्ययग्रहणमपनीयानेकस्वरेषु